Barcode : 99999990293478
Title - Bal Nibandh Mala
Author - Divedi.,Vasudeva
Language - sanskrit
Pages - 117
Publication Year - 1933
Barcode EAN.UCC-13



संस्कृत प्रचार पुस्तक माला सं०-१५

बाल-निबन्ध-माला

[संस्कृत के प्रारम्भिक विद्यार्थियो के लिये अत्यन्त सरल, सरस, ललित,
तथा सन्धि एव समास की जटिलता से निर्मुक्त संस्कृत में लिखे
हुए परीक्षोपयोगी निबन्धो की अद्वितीय पुस्तक]

Prescribed by the
Ministry of Education
Govt of India

लेखकः—
श्री वासुदेव द्विवेदी, वेदशास्त्री साहित्याचार्य,
(संस्कृत प्रचार-पुस्तकमाला—सम्पादक)

सार्वभौम संस्कृत प्रचार कार्यालयः
वाराणसी।

प्रकाशक—

सार्वभौम संस्कृत प्रचार कार्यालय

डी० ३८।२० हौजकटोरा, वाराणसी ।



तृतीय आवृत्ति : एक हजार

मूल्य : १—७५

मुद्रक

भैजनाथ प्रसाद

कल्पना प्रेस,

रामकटोरा रोड, वाराणसी ।

विनीत अभ्यर्थना

संस्कृत की पाठ्य पुस्तकों में प्रारम्भिक कक्षाओं के विद्यार्थियों के लिये उपयोगी पुस्तकों का नितान्त अभाव है। गद्य, पद्य, नाटक, कथा, इतिहास एवं निबन्ध आदि विषयों में से किसी विषय पर संस्कृत में ऐसी पुस्तकें नहीं हैं जो अत्यन्त सरल, ललित एवं आकर्षक हों तथा जिनकी सहायता से विद्यार्थी बिना विशेष परिश्रम के ही, मनोरंजन के साथ, अत्यल्प समय में संस्कृत का आवश्यक ज्ञान प्राप्त कर सकें। इसी अभाव को दूर करने के लिये कार्यालय द्वारा अनेक विषयों पर बालोपयोगी पुस्तकमाला के प्रकाशन का निश्चय किया गया है। तदनुसार ही यह पुस्तक प्रकाशित की जा रही है और इसके पूर्व इसी ढंग की दो और पुस्तकें प्रकाशित हो चुकी हैं।

प्रस्तुत पुस्तक में कुछ परीक्षोपयोगी विषयों पर संस्कृत में लिखे हुए छोटे छोटे निबन्ध प्रकाशित किये जा रहे हैं। इसका प्रधान उद्देश्य निबन्ध लिखने की शिक्षा देने के अतिरिक्त संस्कृत के प्रारम्भिक विद्यार्थियों को शीघ्रता और सरलता के साथ संस्कृत सिखाने में सहायता पहुँचाना है। इसी लिये यह पुस्तक अत्यन्त सरल एवं सुबोध भाषा में लिखी गई है और यथासम्भव सन्धि और समास की परम्परागत जटिलता से अत्यन्त मुक्त रक्खी गयी है। साथ ही इस पुस्तक में ऐसे शब्दों और धातुओं का प्रयोग किया गया है जो सर्वसाधारण में बहुत प्रचलित हैं। फिर भी यदि कोई शब्द विद्यार्थियों के लिये कठिन प्रतीत हुआ है तो उसका टिप्पणी में हिन्दी में अर्थ भी दे दिया गया है। थोड़े से शब्दरूपों तथा धातुरूपों को जानने वाला व्यक्ति भी यदि इस पुस्तक को १-२ बार पढ़ जाय तो इसमें संदेह नहीं कि

वह बहुत अल्प समय में संस्कृत में लिखने पढ़ने तथा बोलने समझने की शक्ति प्राप्त कर सकता है।

जो विद्यार्थी अथवा संस्कृत सीखने के इच्छुक प्रौढ व्यक्ति कम समय में सरलता और मनोरंजन के साथ संस्कृत सीख लेना चाहते हैं उनसे हमारी विनीत प्रार्थना है कि वे कार्यालय द्वारा प्रकाशित सुगम शब्द रूपावली, सुगम धातु रूपावली, बाल-संस्कृतम् तथा बालकविताबली को २० २५ दिन में पढ़ कर इस पुस्तक को तथा साथ ही बालककथामाला बालसम्भाषणम् आदि पुस्तकों को १२ बार बाँच जाँय। ऐसा करने से वे देखेंगे कि दो महीने के भीतर ही उन्हे संस्कृत सीखने मे आश्चर्यजनक लाभ होगा तथा उनका उत्साह दूना—चौगुना हो जायगा। संस्कृत शिक्षण शैली की वर्तमान कठिनता एव नीरसता से परिचित व्यक्ति इस पद्धति की परीक्षा करें यह हमारी विनीत अभ्यर्थना है।

आशा है संस्कृत प्रचार के इच्छुक व्यक्ति, विद्यार्थी एव अध्यापक इस पुस्तक का पठन पाठन में उपयोग कर और इससे लाभ उठा कर इस परिश्रम को सफल बनायेंगे तथा अन्य संस्कृत सीखने के इच्छुक व्यक्तियो के लिये भी पथप्रदर्शक बनकर संस्कृतप्रचार के इस पवित्र कार्य में हमे सक्रिय सहयोग देने की कृपा करेंगे।

सार्वभौम संस्कृत प्रचार कार्यालय
श्रावणपूर्णिमा,—२०२४ वि०
वाराणसी

विनीत—
लेखक

विषय-सूची

१. ईश्वरवन्दना	१	२३. गङ्गा	३१
२. भूमिः	३	२४. मेला	३३
३. सूर्यः	४	२५. वरयात्रा	३५
४. अन्नम्	५	२६. पाठशाला	३६
५. वस्त्रम्	७	२७. परीक्षा	३८
६. फलानि	८	२८. यात्रा	४२
७. पशुः	१०	२९. कृषकाणां दिनचर्या	४४
८. वसन्त ऋतुः	११	३०. द्विचक्रिका (बाइसिकिल)	४८
९. वर्षा ऋतुः	१३	३१. वाष्पशकटम् (रेलगाडी)	५१
१०. गौः	१४	३२. रामलीला	५४
११. हस्ती	१६	३३. कन्दुकक्रीड़ा	५६
१२. आम्रम्	१७	३४. डाक विभागः	५८
१३. सूर्यंस्नम्	१८	३५. पुस्तकालयः	६०
१४. सूर्योदयः	२०	३६. शिक्षा	६२
१५. आर्यावर्तः देशः	२१	३७. विद्या	६३
१६. उत्तरप्रदेशः	२७	३८. अस्माकं राष्ट्रभाषा	६५
१७. हिमालय	२५	३९. पुस्तकानां रक्षा	६८
१८. वाराणसी	२५	४०. व्यायामः	६९
१९. दीपावली	२७	४१. स्वास्थ्यम्	७१
२०. होलिका	२८	४२. समयस्य सदुपयोगः	७२
२१. सरस्वतीपूजा	३०		
२२. दुर्गापूजा	३१		

४३. व्यवहार ज्ञानम्	७४	५२. देश-सेवा	९२
४४. स्वावलम्बनम्	७६	५३. एकता	९३
४५. अतिथिसत्कारः	७७	५४. स्त्रीशिक्षा	९५
४६. संस्कृतप्रचारस्य आवश्यकता	७९	५५. पञ्चायतव्यवस्था	९८
		५६. चलचित्रम्	९९
४७. नम्रता	८२	५७. पुरस्कार-वितरणम्	१०२
४८. सदाचारपालनम्	८४	५८. वैज्ञानिका आविष्काराः	१०४
४९. स्वच्छता	८६	५९. ग्रामोन्नतिः	१०६
५०. परिश्रमः	८८		
५१. कर्तव्यपालनम्	९०		

एक आवश्यक निवेदन

बालोपयोगी पुस्तकमाला की समस्त पुस्तको को सरलता की दृष्टि से सन्धिविहीन पदो मे ही लिखने का निश्चय किया गया है। परन्तु इस पुस्तक मे यह त्रुटि रह गई है कि एक ही वाक्य मे कहीं तो सन्धि कर दी गई है और कहीं नहीं भी की गई है। यह त्रुटि इसके अग्रिम संस्करण तथा अन्य पुस्तकों में नहीं रहेगी ऐसी आशा है। अतः विद्यार्थी सन्धियों पर ध्यान न देकर केवल संस्कृत सीखने की दृष्टि से ही इसका अध्ययन करेंगे यह विनीत निवेदन है।

विनीत—
लेखक

वाग्देवतायै नमः ।

बाल-निबन्ध-माला

१—ईश्वरवन्दना

ईश्वरः संसारस्य सृष्टिकर्ता अस्ति। स एव सूर्यं सृजति[1], स एव चन्द्रं सृजति। स एव ग्रहान् सृजति, स एव नक्षत्राणि सृजति। स एव पशून् सृजति, स एव पक्षिणः सृजति। स एव वृक्षान् सृजति, स एव वनस्पतीन् सृजति। स एव नरान् सृजति, स एव नारीः सृजति। सर्वं स एव सृजति।

ईश्वरः सर्वव्यापकः अस्ति। स सर्वत्र अस्ति। स जले अस्ति, स्थले अस्ति। आकाशे अस्ति, पाताले अस्ति। पशौ अस्ति, पक्षिणि अस्ति। वृक्षे अस्ति, वनस्पतौ अस्ति। स कणे कणे अस्ति स तृणे तृणे अस्ति। स एव अग्रे अस्ति, स एव पश्चात् अस्ति। स एव उपरि अस्ति, स एव नीचैः अस्ति। स एव वामे अस्ति, स एव दक्षिणे अस्ति। स सर्वत्र अस्ति।

ईश्वरः सर्वशक्तिमान् अस्ति। तस्मिन् सर्वाः शक्तयः सन्ति। स रचयितु शक्नोति, नाशयितुं शक्नोति। उत्थापयितु[2] शक्नोति, पातयितु[3] शक्नोति। दातुं शक्नोति, ग्रहीतुं शक्नोति। मारयितुं शक्नोति, जीवयितुं शक्नोति। कर्तुं शक्नोति, संहर्तुं[4] शक्नोति।

१—पैदा करता है। २—उठाने को। ३—गिराने को। ४—संहार करने का।

ईश्वरस्य अनेकानि अद्भुतानि च रूपाणि सन्ति। स निराकारः अपि अस्ति, साकारः अपि अस्ति। निर्गुणः अपि अस्ति, सगुणः अपि अस्ति। स्थूलः अपि अस्ति, सूक्ष्मः अपि अस्ति। महीयान्[४] अपि अस्ति, अणीयान्[५] अपि अस्ति। सः अनादिः अस्ति। सः अनन्तः अस्ति। सः अनेकरूपः अस्ति।

स एव ब्रह्मरूपेण जगतः निर्माणं करोति। स एव विष्णुरूपेण जगतः पालनं करोति। स एव शिवरूपेण जगतः संहारं करोति। स एव वायुरूपेण याति[७]। स एव इन्द्ररूपेण वर्षति। स एव सूर्यरूपेण प्रकाशते। स एव अग्निरूपेण ज्वलति। इदं सर्वं जगत् ईश्वरस्य एव रूपं वर्तते। ततः भिन्नं किमपि नास्ति।

यथा ईश्वरस्य अनेकानि रूपाणि सन्ति तथैव तस्य अनेकानि नामानि अपि सन्ति। ब्रह्म, परमात्मा, परमेश्वरः, जगदीश्वरः, ओङ्कारः इत्यादीनि तस्य अनन्तानि नामानि सन्ति। स एव अरबीभाषायां अल्ला, पारसीभाषाया खुदा तथा अंग्रेजीभाषायां गॉड इति कथ्यते। एक एव ईश्वरः भिन्न-भिन्न-नामभिः आह्वयते[८], भिन्न-भिन्न-पद्धतिभिः भिन्न-भिन्न स्थानेषु च पूज्यते।

ईश्वरः महान् दयालुः अस्ति। स दीनानां पालकः अस्ति। अनाथानां सहायकः अस्ति। पतितानां उद्धारकः अस्ति।

तं महेश्वरं वन्दे। तं परमेश्वरं वन्दे।

४-बहुत बड़ा। ५-बहुत छोटा। ७-चलता है। ८-पुकारा जाता है।

२—भूमिः

यस्मिन् लोके वयं निवसामः स भूलोकः कथ्यते[1]। अस्य भूलोकस्य आधारः भूमिः एव अस्ति। भूमेः द्वौ भागौ वर्तेते- जलभागः तथा स्थलभागः। यस्मिन भागे जलं वर्तते स जल-भागः अस्ति। यथा सरितः[2] समुद्राश्च यस्मिन भागे जनाः निवसन्ति स स्थलभागः कथ्यते।

भूमिः अस्माकं कृते महान उपकारी पदार्थः अस्ति। भूमौ वयं भवामः, भूमौ वयं निवसामः। भूमौ वयं चलामः, भूमौ वयं तिष्ठामः। भूमौ वयं स्वपामः, भूमौ वयं जागृमः। भूमौ वयं जीवामः, भूमौ वयं म्रियामहे। भूमौ वयं हसामः, भूमौ वयं नन्दामः।

भूमौ अन्नानि उत्पद्यन्ते यानि वयं भक्षयामः। भूमौ जलं मिलति यद् वयं पिबामः। भूमौ गृहाणि निर्मीयन्ते[3] येषु वयं निवसामः। भूमौ गजा अश्वा भवन्ति यान् वयम् आरोहामः[4]। भूमौ एव तानि सर्वाणि वस्तूनि भवन्ति येभ्यः वयं सुखं शान्तिं च प्राप्नुमः[5]। अतएव भूमिः वसुधा वसुन्धरा च उच्यते।[6]

भूमेः महत्त्वम् अवर्णनीयम् अस्ति। अस्याः गौरवम् अतुल-नीयम् अस्ति। भूमिः जन्मदात्री अस्ति। भूमिः जीवनदात्री अस्ति। भूमिः अन्नदात्री अस्ति। भूमिः वस्त्रदात्री अस्ति। भूमिः सर्वदात्री अस्ति।

१—कहा जाता है। २—नदियाँ। ३—बनाये जाते हैं। ४—चढ़ते हैं। ५—पाते हैं। ६—कही जाती है।

अतएव अस्याः सेवा, सदुपयोगः, संरक्षणं च सर्वेषां भूमिवासिनां परमं कर्तव्यं वर्तते ।

३—सूर्यः

सूर्यः एकः तेजोमयः पदार्थः अस्ति । अयं गोलाकारः भवति । सूर्यः पृथिव्याः अपि महान् अस्ति परं दर्शने लघुः प्रतिभाति[1] ।

सूर्यः प्रातःकाले पूर्वदिशायाम् उदेति[2] । अयं सायङ्काले पश्चिमदिशायाम् अस्तं गच्छति । एवं प्रतिदिनं सूर्यः उदेति प्रतिदिनं च अस्तं गच्छति ।

सूर्यः महान् उपकारी पदार्थः अस्ति । यदा सूर्यः उदेति तदा संसारस्य अन्धकारः नश्यति । प्रभातं जायते । सर्वे प्राणिनः जाग्रति । सर्वेषु नवीन चैतन्यं समायाति[3] । सर्वे स्व-स्व कर्मणि संलग्ना भवन्ति । अन्यच्च-सूर्येण एव दिनस्य रात्रेश्च विभागः भवति । सूर्येण एव ऋतुपरिवर्तनं भवति । सूर्यद्वारा एव कालस्य ज्ञानं जायते ।

सूर्यस्य किरणेषु जीवनदायिनी शक्तिः अस्ति । सूर्यस्य किरणैः कुसुमानि विकसन्ति[4] । सूर्यस्य किरणैः अंकुराणि उद्गच्छन्ति[5] । सूर्यस्य किरणैः शस्यानि वर्द्धन्ते । सूर्यस्य किरणैः फलानि पच्यन्ते[6] । सर्वे पदार्थाः सूर्यस्य किरणैः जीवनं गृह्णन्ति । पोषणं प्राप्नुवन्ति । वृद्धिं च गच्छन्ति ।

१—मालूम पड़ता है । २—उगता है । ३—आ जाता है । ४—खिलते हैं । ५—उगते हैं । ६—पकते हैं ।

सूर्यस्य किरणेषु आरोग्यदायिनी अपि शक्तिः अस्ति। सूर्यस्य किरणैः अनेके रोगा नश्यन्ति। सूर्यस्य किरणैः जलं वायुश्च विशुद्धौ भवतः। सूर्यस्य किरणैः रोगजनकाः कीटाणवः म्रियन्ते[७]। सूर्यनमस्कारेण स्वास्थ्यं सुन्दरं तिष्ठति। सूर्योपस्थानेन अनेके लाभाः भवन्ति। किमधिकम्[८]। सूर्यस्य एव कृपया जगत् जीवति वर्द्धते च। अत एव वेदे लिखितं वर्तते—

सूर्य आत्मा जगतः तस्थुषश्च।

४—अन्नम्

यत् अद्यते[१] तत् अन्नं कथ्यते। अन्नं बहुविधं भवति। यथा—धान्यं, गोधूमः, जवः, कोद्रवः, आढकी, कलायः, मुद्गः, मापः, मकायः, मडुकः, यावनालश्चेत्यादयः।

अन्नं जीवनाय अति आवश्यकं वस्तु अस्ति। अन्नेन एव सर्वे जनाः जीवन्ति। अन्नं विना कोऽपि जीवितुं न शक्नोति। अनेके पशवः तथा पक्षिणः अपि अन्नमेव उपजीवन्ति।

एभिः एव अन्नैः नानाविधानि खाद्यवस्तूनि निर्मीयन्ते[२]। धान्येन, कोद्रवेण, श्यामाकेन च ओदनं पच्यते[३]। गोधूमेन, जवेन, कलायेन च रोटिका निर्मीयते। आढक्या, चणकेन, मुद्गेन मापेण च दालिः निर्मीयते। गोधूमस्य पिष्टकेन अपूपा

७—मरते है। ८ अधिक कहाँ तक कहा जाय।

१—खाया जाता है। २—बनाये जाते है। ३—पकता है।

अपि पच्यन्ते चणकस्य चूर्णेन घटका विरच्यन्ते[४]। एभिः एव अन्नैः नानाविधानि मोदकानि निर्मीयन्ते।

उपरि लिखितानि खाद्यवस्तूनि सर्वत्र प्रसिद्धानि सन्ति। परन्तु एतद्तिरिक्तं चिपिटान्नं[५] तथा सक्तुः[६] इति द्विविधम् अन्यदपि खाद्यं क्वचित् २ प्रसिद्धं वर्तते। अनयोः चिपिटान्नं धान्येन निर्मीयते तथा सक्तुश्च चणकेन मकायेन[७] जवेन च। केषुचित् प्रदेशेषु अनयोः खाद्ययोः महान् प्रचारः अस्ति। निर्धनाः जनाः प्रायेण सक्तुभिः जीवनं यापयन्ति[८]।

अन्नं विना जीवनं सर्वथा असम्भवं वर्तते। यदि एकस्मिन् दिने अन्नं न मिलति तदा जनाः निर्बलाः निर्जीवाश्च भवन्ति। अन्नं विना न गानं रोचते न वाद्यम्। न कीर्तनं रोचते न भजनम्। न पठनं रोचते न लेखनम्। न हासः रोचते न परिहासः। न क्रीडा रोचते न कौतुकम्। न पूजा रोचते न न पाठः। सर्वं कार्यं तदैव रोचते यदा उदरम् अन्नेन परिपूर्णं भवति, भरितं भवति।

अतएव सर्वैः अन्नस्य उपार्जनं रक्षणं च कर्तव्यम्। इदानीं भारते जनसंख्या दिने दिने वर्द्धमाना[१०] एव विलोक्यते। अतः सम्प्रति भारतीयैः जनैः अन्नसम्बद्धने विशेषरूपेण ध्यानं दातव्यम्।

४-बनाये जाते है। ५-चिउडा। ६-सत्तू। ७-मकई से। ८-बिताते हैं। ९-पेट। १०-बढ़ती हुई।

५.—वस्त्रम्

वस्त्रं मनुष्याणां कृते एकं परमावश्यकं वस्तु अस्ति। वस्त्रेण शरीरम् आच्छाद्यते[1]। वस्त्रेण गुप्तानि अङ्गानि गोप्यन्ते[2]! वस्त्रेण शरीरस्य शोभा भवति। वस्त्रं सभ्यतायाः चिह्नम् अस्ति। सुन्दरैः वस्त्रैः समाजे सम्मानः भवति। अतएव मानवसमाजस्य कृते वस्त्राणां महती उपयोगिता वर्तते।

वस्त्राणि नानाविधैः सूत्रैः निर्मीयन्ते। कानिचित् कर्पासस्य[3] सूत्रैः निर्मीयन्ते। कानिचित् ऊर्णासूत्रैः[4] निर्मीयन्ते। कानिचित् कृमिजैः[5] सूत्रैः निर्मीयन्ते। कानिचित् सणसूत्रैः[6] निर्मीयन्ते। कानिचित् च अन्यैः सूत्रैः।

एषु कर्पासस्य वस्त्राणि समर्घाणि[7] भवन्ति। अन्यानि वस्त्राणि च महर्घाणि[8] भवन्ति। अतएव सर्वे जनाः अधिकतया कर्पासस्य एव वस्त्राणि परिदधते[9]।

वस्त्रैः बहुविधानि परिधानानि[10] निर्मीयन्ते। धौतवस्त्रं[11] निर्मीयते, शाटी[12] निर्मीयते। कञ्चुकं[13] निर्मीयते, कूर्पासकं[14] निर्मीयते। दुकूलं[15] निर्मीयते, अङ्गप्रोञ्छनं[16] निर्मीयते। अङ्गरक्षकं[17] निर्मीयते, टोपिका निर्मीयते। आस्तरणं[18] निर्मीयते, आच्छादनं[19] निर्मीयते। उपानत्[20] निर्मीयते,

---

१—ढंका जाता है। २—ढंपे जाते हैं। ३—कपास के। ४—ऊन के सूतों से। ५—कीड़ों से उत्पन्न (सूतों से)। ६—सन के सूतों से। ७—सस्ते। ८—महँगे। ९—पहिनते हैं। १०—पहनावे। ११—धोती। १२—साड़ी। १३—कुर्ता। १४—चोली। १५—दुपट्टा। १६—अँगोछी। १७—अँगरखा। १८—बिछौना। १९—ओढ़ना। २०—जूता।

छत्रं[21] निर्मीयते। वितानं[22] निर्मीयते, पटकुटी[23] निर्मीयते। एवं प्रकारेण नानाविधानि परिधानानि आवश्यकवस्तूनि च निर्मीयन्ते।

६—फलानि

फलानि भक्ष्यवस्तूनि[1] सन्ति। इमानि वृक्षेभ्यः उत्पद्यन्ते। कानिचित् फलानि लताभ्यः अपि जायन्ते।

फलानाम् अनेका जातयः सन्ति। यथा—आम्रम्, मधूकम्[2] जम्बूफलम्, पेरुकम्[3], पनसम्[4], कर्कटी[5], कालिङ्गकचेत्यादयः[6]। एकस्याम् अपि जातौ अनेके भेदाः भवन्ति। यथा आम्रस्य बीजु, कलमी, मालदह, लँगड़ा, सेनुरिया प्रभृतयः भेदाः।

रूपभेदेन फलानि बहुविधानि भवन्ति। आम्रम्, जम्बूफलम् बदरीफलं[7] चेत्यादीनि किञ्चित् लम्बानि भवन्ति। निम्बूकम्, दाडिमम्[8], लकुचञ्चेत्यादीनि[9] गोलाकाराणि भवन्ति। फलेषु पनसं सर्वेभ्यः विशालं लम्बं च भवति।

रसभेदेन अपि फलानि विविधानि भवन्ति। कानिचित् मधुराणि भवन्ति। यथा—आम्रम्। कानिचित् कषायाणि[10]

२१—छत्ता। २२—शामियाना। २३—शमटी।

१—खाने योग्य पदार्थ। २—महुआ। ३—अमरूद। ४—कटहल। ५—ककड़ी। ६—कालमी। ७—बेर। ८—अनार। ९—बदहर। १०—कसैले।

भवन्ति। यथा—आमलकम्[11]। कानिचित् अम्लानि भवन्ति। यथा—आम्रातकम्[12] इम्लिका[13] निम्बूकम्।

फलाना गुणा अपि विभिन्ना भवन्ति। केचन हानिकरा भवन्ति केचन लाभकरा।

इमानि फलानि विभिन्नकालेषु पच्यन्ते[14]। कानिचित् फलानि ग्रीष्मे, कानिचित् फलानि वर्षासु, तथा कानिचित् अन्यसमयेषु पच्यन्ते। कानिचित् फलानि तु द्वादशसु अपि मासेषु पच्यन्ते।

फलाना विविधैः प्रकारैः उपयोगः क्रियते। कानिचित् फलानि भक्ष्यन्ते[1]। कानिचित् फलानि चूष्यन्ते[2]। केचित् फलैः लेह[3] सन्धान[4] च निर्मीयते[5]। केषाञ्चित् फलानाम् औषधार्थं उपयोगः भवति। केषाञ्चित् शाकम् अपि अति स्वादिष्ठ भवति। केचन निर्धना जनास्तु अन्नाभावे फलैः एव दिनानि दिनानि यापयन्ति[6]।

उपरि लिखितभ्यः फलेभ्यः भिन्नानि अपि कानिचित् फलानि भवन्ति यानि श्रेष्ठफलानि मन्यन्ते। यथा—नारिकेलम्[7], द्राक्षा[8], शुष्कखर्जूरम्[9], निकोचकम्[10], दाडिमम्[11], नारङ्गश्चेत्यादीनि[12]। इमानि फलानि निश्चयरूपेण स्वास्थ्यकराणि बलयर्द्धकानि च भवन्ति।

एव फलानि अस्माकं कृते बहुलाभकराणि भवन्ति।

११—अँवरा। १२—अमड़ा। १३—इमली। १४—पकते है।

१—खाये जाते है। २—चूसे जाते हैं। ३—चटनी। ४—अँचार। ५—बनाया जाता है। ६—बिताते है। ७—नारियल। ८—दाख। ९—छुहारा। १०—बिजौरा। ११—अनार। १२—नारंगी।

७--पशुः

पशुः एका प्राणिनां जातिः अस्ति। सर्वे पशवः चतुष्पदाः[1] स्तनपायिनश्च[2] भवन्ति। सर्वेषां पशूनां लघु महत् वा पुच्छम् अपि भवति। मनुष्याः इव पशवः अपि गर्भान् उत्पद्यन्ते।

संसारे पशूनाम् अनेकाः जातयः सन्ति। सर्वेषां स्वरूपाणि, गुणा, स्वभावाश्च भिन्न-भिन्नाः भवन्ति। एतेषां ध्वनयः अपि परस्परं विलक्षणाः भवन्ति।

पशुषु केचन वन्याः[3] भवन्ति, केचन ग्रामवासिनः। केचन पशवः जलचरा अपि भवन्ति। सिंह-व्याघ्रादयः वन्याः सन्ति। गो महिष्यादयः[4] ग्रामवासिनः सन्ति। नक्र-मकरादयः[5] जलचराः पशवः सन्ति।

एषु वन्या पशवः प्रायेण भयानकाः तथा हिंसकाः भवन्ति। ते वनेषु विचरन्ति तथा दुर्बलान् जीवान् मारयित्वा खादन्ति। जलचराः जीवाः जले एव सदा निवसन्ति। तेषु अपि सबलाः निर्बलान् जीवान् भक्षयन्ति।

इमे वन्याः जलचराश्च जीवाः मनुष्याणां कृते प्रायेण हानिकराः एव भवन्ति। एषु केचन एव किञ्चित् उपकारं कुर्वन्ति। परन्तु ग्रामीणाः पशवः मनुष्यसमाजस्य कृते अतीव आवश्यकाः तथा उपयोगिनश्च भवन्ति।

ग्राम्येषु पशुषु गौः दुग्धं ददाति बलीवर्दान्[6] च जनयति[7]।

१--चौपाये। २ स्तन पीने वाले। ३--जंगली। ४--गाय भैंस वगैरह। ५--नाक मगर वगैरह। ६--बैलों को। ७--पैदा करती है।

बलीवर्दैः अस्माकं कृषिः जायते। महिषी प्रभूतं[9] दुग्धं तथा दधि ददाति। महिषाः[10] शकटानि[11] वहन्ति हलं च चालयन्ति। गजाः अश्वाः उष्ट्राश्च वाहनकार्यं कुर्वन्ति। अश्वाः तथा उष्ट्राः भारम् अपि वहन्ति। गर्दभा[12] रजकानां[13] कृते[14] बहु उपयोगिनः भवन्ति। एते प्रभूतं वस्त्रभारं वहन्ति। अजा[15] अपि आरोग्यकरं दुग्धं ददाति। मेषाणां[16] लोमभिः कम्बलाः निर्मीयन्ते। कुक्कुराः गृहाणां रक्षां कुर्वन्ति। बिडालाः मूषकेभ्यः भयं निवारयन्ति।

बहवः जनाः एषां पशूनां व्यापारम् अपि कुर्वन्ति तेन च बहु धनम् उपार्जयन्ति। एवं ग्राम्यपशूनां मानवसमाजे महती उपयोगिता वर्तते।

८—वसन्त ऋतुः

भारते एकस्मिन् वर्षे षट्[1] ऋतवः भवन्ति। द्वयोः द्वयोः मासयोः एकः ऋतुः भवति। तत्र चैत्रवैशाखौ वसन्तो भवति। ज्येष्ठः आषाढश्च ग्रीष्मो भवति। श्रावण-भाद्रपदौ च वर्षा उच्यन्ते। आश्विन[2]-कार्तिकौ शरद् भवति। आग्रहायणः[3] पौषश्च हेमन्तः कथ्यते तथा माघः फाल्गुनश्च शिशिरः भवति। एवं प्रकारेण एकस्मिन् वर्षे षड् ऋतवः भवन्ति।

एषु ऋतुषु वसन्त ऋतुः प्रथमः ऋतुः अस्ति। अयं ऋतुः

८-बहुत ९—भैंसे। १०—गाड़ी, छकड़ा, ११—गदहा। १२—धोबियों के ११—लिये १४—बकरियाँ। १५—भेड़ों के।

१—छः २—क्वार ३—अगहन।

अतीव रमणीयः भवति। अस्मिन् ऋतौ प्रकृतौ सर्वत्र अपूर्वं सौन्दर्यं दृश्यते[4]। जडे चेतने च सर्वत्र नवः उल्लासः अवलोक्यते[5]। नरेषु नारीषु, बालकेषु वृद्धेषु च कापि अपूर्वा मादकता[6] समायाति। अस्माकं देशस्य प्रसिद्धः वसन्तोत्सवः होलिका अस्यैव ऋतोः आरम्भे भवति।

शिशिर ऋतौ सर्वेभ्यः वृक्षेभ्यः पत्राणि निपतन्ति। परन्तु यदा वसन्त ऋतुः आयाति तदा वृक्षे वृक्षे नूतनानि पल्लवानि लगन्ति। पल्लवे पल्लवे नवीनानि कुसुमानि विकसन्ति। कुसुमे कुसुमे अपूर्वः सुगन्धः आयाति।

अन्यच्च[7]—वने वने कोकिलाः कूजन्ति। पुष्पे पुष्पे भ्रमराः गुञ्जन्ति। मुखे मुखे वसन्तगीतानि श्रूयन्ते वनानि उपवनानि शोभन्ते। पशवः पक्षिणः मोदन्ते। सर्वत्र सर्वैरेव महान् आनन्दः अनुभूयते।

अस्मिन् ऋतौ शीतलः मन्दः सुगन्धिश्च वायुः वहति। इदानीं न अधिकं शीतं भवति न अधिका उष्णता भवति। अनेन कारणेन भ्रमणे, खेलने, कूर्दने च महान् आनन्दः भवति। एभिः कारणैः अयं वसन्तऋतुः ऋतुराज इति कथ्यते।

१-वर्षा-ऋतुः

ऋतुषु तृतीयः ऋतुः वर्षा ऋतुः भवति। ग्रीष्मानन्तरं वर्षा-ऋतुः आगच्छति। वर्षा-ऋतौ अधिकतया वर्षा भवति। अत एव अयं ऋतुः वर्षा-ऋतुः कथ्यते।

४–५ दीख पड़ता है। ६—मतवालापन ७—और भी ८—गर्मी।]

वर्षा ऋतौ प्रायेण सर्वदैव वृष्टिः भवति। आकाशमण्डल निरन्तर मेघै आच्छन्न तिष्ठति। कदाचित् जलबिन्दवः पतन्ति। कदाचिन् मुसलधारा वृष्टि भवति। अस्मिन् ऋतौ सर्वे जलाशया जलेन परिपूर्णा[1] भवन्ति। समन्तात्[2] जलमयी भूमि दृश्यते।

वर्षा ऋतौ दृश्यम् अतीव रमणीय भवति। वनेषु उपवनेषु, वाटिकासु[3] वृक्षेषु, लतिकासु कुसुमेषु, शस्येषु[4] शाद्वलेषु[5], दिशासु विदिशासु च सर्वत्र नयनाभिरामो हरीतिमा[6] दृष्टिगोचरो भवति। अस्य दिगन्तव्यापिनी[7] श्यामलता[8] सर्वेषा मनांसि मोहयति तथा स्वाभाविकी सरसता नीरसे अपि हृदये रसधारा सिञ्चति।

वर्षा-ऋतौ प्रकृतिनटी विविधानि रूपाणि धारयति। क्वचित् मेघा गर्जन्ति। क्वचित् विद्युत[10] विस्फुरन्ति[11]। कदाचित् झञ्झावात[12] वाति। कदाचित् प्रकाश भवति। कदाचित् अन्धकार भवति। कदाचित् च इन्द्रधनु प्रकाशते।

वर्षा ऋतौ सर्वेषा महान् आनन्द[9] भवति। वनेषु मयूराः नृत्यन्ति। जलाशयेषु मण्डूका[13] रटन्ति। बिलेषु झिल्लिकाः[14] नन्दन्ति। वृक्षेषु चातका कूजन्ति। वीथिषु[15] बालका खेलन्ति।

वर्षाया समय कृष्यै अपि बहु लाभदायक भवति। अस्मिन् समये कर्षका भूमि कर्षन्ति[16]। क्षेत्रेषु बीजानि वपन्ति[17]। धान्यस्य वृद्धि अस्मिन् एव ऋतौ भवति। शस्यानां तृणलतादीना च महती प्रचुरता जायते।

१—घिरा हुआ। २—चारो ओर। ३—बगीचों में। ४—फसलों में। ५—हरी हरी घासों में। ७—हरियाली। ८—दिशाओं के अन्त तक फैली हुई। ९—श्यामता। १०—बिजलियाँ। ११—चमकती है १२—वर्षा के साथ बहने वाली हवा। १३—मेढक। १४—झींगुर। १५—गलियों में। १६—जोतते हैं। १७—बोते हैं।

"अस्मिन् ऋतौ कष्टमपि-बहु भवति। भूमिः पङ्किला जायते। तेन अनेके भूमौ स्खलन्ति[१८] पतन्ति[१९] च। जलस्य आधिक्येन मार्गा. अवरुद्धा.[२०] भवन्ति। वायुमण्डलं दूषितं भवति। अनेके रोगाः उत्पद्यन्ते। कीट-पतंगादीनां बहुलता जायते। घोरान्धकारे चौराणाम् उपद्रव. वर्द्धते। इमानि कष्टानि भवन्ति।

तथापि वर्षा-ऋतु. महान् आनन्ददायी ऋतुः अस्ति।

१०—गौः

गौः एकः चतुष्पात्[1] पशुः अस्ति। अस्या. एकं पुच्छं भवति। द्वे शृंगे[2] भवतः। चत्वारः पादाः भवन्ति। अस्या. गले एकं गलकम्बलं[3] भवति। इदं गलकम्बलं अन्यपशूनां गले न भवति।

गौ तृणचारी पशु. अस्ति। इयं वनेषु भ्रमति घासं तृणं च चरति। यावत् इयं वनेषु इतस्तत न भ्रमति, नवं नवं तृणं न चरति, तावत् अस्याः सन्तोष. न भवति। अस्याः स्वभाव अतीव सरलः भवति।

गौ. महान् उपकारी पशुः अस्ति। इयं दुग्धं ददाति। दुग्धेन दधि भवति। दध्ना घृतं नवनीतं[4] च जायते। अस्याः दुग्धं दधि घृतं च अतीव पवित्रं हितकारकं च भवति।

गौः गोमयं[5] ददाति। गोमयेन गृहं लिप्यते। गोमयेन

१८—फिसलते हैं। १९—गिरते हैं। २०—रुके हुए।

1—चौपाया। २—सींग। ३—गायों के गले में लटकने वाला मांस-पिण्ड। ४—मक्खन। ५—गोबर।

रसवती[1] पच्यते[2]। गोमयस्य स्नानेन शस्य वर्द्धते। पूजाकार्ये अपि गोमयस्य उपयोगो भवति। गोमूत्रेण च अनेके रोगाः नश्यन्ति।

गौ वत्सान् जनयति। ते शने शने वृषभा भवन्ति। ते वृषभै कृषिकार्यं भवति। वृषभा हल वहन्ति। वृषभा शकट वहन्ति। वृषभा भार वहन्ति। ते एव तैलयन्त्रम् अपि चालयन्ति। एव वृषभै ससारस्य महान् उपकार भवति। महत् कल्याण सम्पद्यते।

गोदुग्धम्, गोदधि, गोघृतम्, गोमूत्र गोमय चेति इमानि पञ्च वस्तूनि अतीव पवित्राणि मन्यन्ते। देवपूजाया, पितृकार्ये, सस्कारेषु, हवनकर्मणि च एषा भूयान् उपयोग भवति। पञ्चगव्यस्य पानेन पापानि अपि नश्यन्ति। गो दानेन महत् पुण्य भवति। सर्वे हिन्दव सर्वेषु धर्मकार्येषु गोदान कुर्वन्ति।

गो अगणनीया उपकाराः सन्ति। गौ पशु नास्ति। सा माता अस्ति, पिता अस्ति, देवता अस्ति। अत एव गोरक्षाया अस्माक शास्त्रेषु बहु महत्त्व लिखित वर्तते। गोरक्षा मनुष्याणा कृते एकं परमावश्यक कर्तव्य वर्तते। अत सर्वै गवा रक्षण पालन पोषण सवर्द्धन च कर्तव्यम्।

१—रसोई। २—पकती है। ८—बहुत ज्यादा।

११-हस्ती

हस्ती एक महान् पशु अस्ति। अस्य शरीरम् अति विशाल भवति। अस्य सर्वाणि अगानि स्थूलानि महान्ति च भवन्ति। केवलम् अस्य अक्षिणी[1] ह्रस्वे[2] भवत।

हस्तिन एक विशिष्टम् अङ्ग भवति। तस्य नाम शुण्डा[3] अस्ति। शुण्डया स बहूनि कार्याणि करोति। शुण्डया वृक्षाणा शाखा त्राटयति। शुण्डया स खाद्यवस्तूनि मुखे निक्षिपति[4]। शुण्डया जल पिबति। शुण्डया जिघ्रति[5]। शुण्डया हन्ति। हस्ती हस्तस्य सर्वं कार्यं शुण्डया एव करोति।

हस्ती स्वभावेन अतीव धीर तथा गम्भीर भवति। स चञ्चल न भवति। स महाबलवान् अपि अस्ति परन्तु बलस्य अभिमान न करोति। अनेके बालका अपि हस्तिपका[6] भवन्ति। ते अङ्कुशन हस्तिन मारयन्ति। परन्तु हस्ती तेषाम् उपरि कोप न करोति। ते यथा कथयन्ति स तथैव चलति आचरति च।

हस्ती वाहनस्य कार्यं आगच्छति। रात्रौ वर्षाकाले च अस्य विशेषेण उपयोगो भवति। वरयात्रासु अपि हस्तिना विशेषरूपेण आवश्यकता भवति। हस्तिनम् आरुह्य मृगया[7] अपि विधीयते। पूर्वं युद्धेऽपि हस्तिनाम् उपयोगो भवति स्म।

हस्तिन दन्ता अपि द्विविधा भवन्ति। अनेके दन्ता मुखस्य अभ्यन्तर एव तिष्ठन्ति। पर द्वौ दन्तौ मुखाद् बहिः तिष्ठत[8]।

१—आँखें। २—छोटी। ३—सूँड़। ४—तोड़ता है। ५—फेंकता है, डालता है। ६—घूमता है। ७—हाथीवाल। ८—शिकार।

तौ अतीव दीर्घौ[९] भवत । परन्तु आभ्या दन्ताभ्या भक्षणस्य कार्यं न भवति। इमौ केवल दर्शनाय एव तिष्ठत । पर यदा त्रुटितौ[१०] भवत तदा छुरिकादिनिर्माणे एषा दन्तानाम उपयोगो भवति। हस्तिना दन्तै अन्यानि च अनेकानि दर्शनीयवस्तूनि निर्मीयन्ते।

हस्ती एक अतीव दर्शनीय पशु अस्ति। अनेके हस्तिन बहूनि कौतुकानि अपि कुर्वन्ति। हस्तिना विशाल शरीर, गम्भीर स्वभाव, मन्द मन्द गमन, अनुशासन पालन च दृष्ट्वा मनसि महती प्रसन्नता भवति।

१२–आम्रम्

अस्माक देशे बहुविधानि फलानि भवन्ति। तेषु फलेषु आम्र सर्वोत्तम फलम् अस्ति। अत एव इद फलाना राजा मन्यते। आम्र प्राय सर्वेषु अपि देशेषु फलति। परन्तु भारत-वर्षस्य आम्राणि विशेषरूपेण प्रसिद्धानि सन्ति।

उत्पत्तिभेदेन आम्र द्विविध भवति। एक "बीजू" कथ्यते अपर च "कलमी" इति। बीजू आम्रस्य रोहिनिया सेन्दुरिया इत्यादय शताधिका भेदा भवन्ति। कलमी आम्रस्य च मालदह, बम्बैया, लँगडा इत्यादय बहव भेदा सन्ति।

"बीजू" आम्रस्य फलानि लघूनि[१] भवन्ति। तदपेक्षया[२]

९—लम्बे। १०—टूटे हुए। १—छोटे। २—उनकी अपेक्षा।

"कलमी" आम्राणि वृक्षन्ति[१] भवन्ति। बीजू आम्राणि सर्वेषां कृते सुलभानि भवन्ति पर कलमी आम्राणि तु धनिकेभ्य एव सुलभानि भवन्ति। यत तानि सर्वत्र न उत्पद्यन्ते[२], महर्घाणि[३] च भवन्ति।

सर्वाणि आम्राणि प्राय वसन्त ऋतौ एव फलन्ति। आम्रफलानि प्रायेण मधुराणि एव भवन्ति। केषाञ्चित् मधुरता तु अवर्णनीया भवति। कानिचित् अम्लानि[४] तथा नीरसानि अपि भवन्ति। परन्तु एतादृशानि फलानि अल्पानि भवन्ति।

आम्रफलस्य अनेके उपयोगा भवन्ति। यदा आम्राणि अपक्वानि भवन्ति तदा तेषा लेह्यादि[५]—निर्माण भवति। यदा पक्वानि भवन्ति तदा चूष्यन्ते[६]। आम्राणा रसै आम्रावर्त[७] अपि निर्मायते। आम्राणि शोषयित्वा[८] तेषा चूर्णम् अपि जना निर्मान्ति[९] यत् "अमचूर" इति कथ्यते। तस्य व्यञ्जनेषु उपयोगः भवति। एव प्रकारेण आम्रफल बहु उपकारक सुलभ स्वादिष्ठ मनोहर च फलम् अस्ति। अत एव सस्कृतकविभि आम्रफलस्य प्रशसाया बहूनि पद्यानि लिखितानि सन्ति।

१३-सूर्यास्तम्

यदा सूर्य अस्त गच्छति तदा सूर्यास्तकाल भवति। साय काले सूर्य अस्त गच्छति। अत सायङ्काल सूर्यास्तकाल भवति। सूर्य पश्चिमदिशायाम् अस्त गच्छति।

१-बड़े। ४-उत्पन्न होते है। ५-मँहगे। ६-खट्टे। ७—चटनी आदि। ८—चूसे जाते हैं। ९—अमावट। १०—सुखाकर। ११—बनाते है।

सूर्यास्तस्य समयः विश्रामस्य समयः भवति। तस्मिन् समये सर्वे विश्रामं कुर्वन्ति। विद्यार्थिनः पठित्वा गृहम् आगच्छन्ति। गोचारकाः गाः चारयित्वा गृहं नियर्तन्ते[1]। भृतकाः[2] भृतिं[3] कृत्वा गृहं समायान्ति। पथिकाः गमनं विहाय क्वचित् आश्रयं गृह्णन्ति।

एवमेव सायङ्काले वणिजः पण्यानि[4] पिदधति[5]। पशवः गोष्ठेषु[6] बध्यन्ते। पक्षिणः स्वकुलायेषु[7] निलीयन्ते[8]। यात्रिणः क्वचित् विश्रामं कुर्वन्ति। भिक्षुकाः स्वगृहाणि परावर्तन्ते[9]। एवं सर्वे अपि स्वं स्वं निवासस्थानं समाश्रयन्ति[10]।

सूर्यास्तस्य समयः मनुष्याणां कृते—तत्रापि विशेषतः नागरिकाणां कृते—विहारस्य समयः भवति। अस्मिन् समये केचन खेलन्ति। केचन भ्रमणं कुर्वन्ति। केचन वाटिकासु[11] विहरन्ति। केचन नदीना तीरेषु भ्रमन्ति। केचन मन्दिरेषु-देवदर्शनाय गच्छन्ति। केचन मित्रैः सह मनोरञ्जनं कुर्वन्ति।

सूर्यास्त-समये सर्वत्र अन्धकारः प्रसरति[12]। अतः तस्मिन् समये गृहे-गृहे दीपकाः ज्वालयन्ते। नगरेषु आपणेषु[13] च सूर्यास्तस्य दृश्यम् अतीव रमणीयं भवति।

१—लौटते है। २—नौकर। ३—नौकरी, मजदूरी। ४—दूकानें। ५—बन्द करते हैं। ६—घोठो में। ७—अपने घोसलों में। ८—ठिकाने हैं। ९—लौटते है। १०—पाश्रय लेते है। ११—बगीचों में। १२—पसरता है, फैलता है। १३—बाजारों में।

१४—सूर्योदयः

सूर्यस्य उदयः सूर्योदयः कथ्यते। प्रातः काले पूर्वदिशायां सूर्योदयः भवति। यदा सूर्योदयः भवति तदा अन्धकारस्य नाशः तथा सर्वत्र प्रकाशः जायते।

सूर्योदयस्य समयः अतीव स्फूर्तिमयः तथा उत्साहमयः भवति। तस्मिन् समये सर्वे जनाः शयनात् उत्तिष्ठन्ति[1]। उत्थाय[2] च केचन भ्रमणार्थं गच्छन्ति। केचन नित्यक्रियाः कुर्वन्ति। ततश्च सर्वे स्वे स्वे दैनिके कार्ये संलग्ना भवन्ति।

कर्षकाः[3] क्षेत्रेषु हलं चालयन्ति। वणिजः[4] आपणेषु[5] पण्यान[6] उद्घाटयन्ति[7]। स्त्रियः गृहकार्याणि कुर्वन्ति। विद्यार्थिनः पठनं लेखनं च आरभन्ते। पूजकाः मन्दिरेषु पूजाम् अनुतिष्ठन्ति[8]। ब्रह्मचारिणः गुरुकुलेषु सन्ध्योपासनं विदधति। कर्मकराश्च[9] स्वानि स्वानि कार्याणि कर्तुं गच्छन्ति।

एवमेव सूर्योदये जाते पशुपक्षिणः अपि स्व स्व-व्यापारे संलग्ना भवन्ति। कीटाः पिपीलिकाः[10] अपि उद्यमे निरता भवन्ति।

यदा सूर्योदयः भवति तदा वनस्पतिषु अपि नवीनता आयाति। लता-विटपादयः उल्लसिता जायन्ते। पल्लवाः पुष्पाणि च प्रफुल्लितानि भवन्ति। एवं सूर्योदयेन प्रकृतिराज्ये सर्वत्र नवीना चेतना, नवीनः उत्साहः नवीनं च सौन्दर्यं समायाति[11]।

१—उठते हैं। २—उठकर। ३—किसान। ४—बनिया। ५—बजारों में। ६—दूकानें। ७—खोलते हैं। ८—करते हैं। ९—मजदूर। १०—चीटियाँ। ११—आ जाता है।

दौर्भाग्यवशात् अनेके अलसा जना सूर्योदयकाले अपि शयन न मुञ्चन्ति [२]। अनेके शयनात् उत्थाय अपि किञ्चित् कार्यं न कुर्वन्ति। परन्तु अय स्वभाव हितकर नास्ति। अत. सर्वै अपि जने प्रात काले उत्थाय कर्तव्यपरायणै भवितव्यम्।

१५—अस्माकदेश:

अस्माक देशस्य प्राचीन नाम "भारत वर्तते। सम्प्रति" अस्य हिन्दुस्तान, हिन्द, इण्डिया इत्यपि नामानि सन्ति। अस्य पूर्वदिशाया ब्रह्मदेश, (वर्मा) अस्ति। दक्षिणदिशाया लका अस्ति। पाश्चमदिशाया आफगानिस्थान वतते। उत्तरदिशाया च हिमालय अस्ति।

अय देश पूयम् एक महान् अखण्ड विशालदेश आसीत्। परन्तु सम्प्रति अय गौराङ्गाणा[२] दुर्नीया यवनाना दुराग्रहेण च खण्डित सवृत्ता वर्तते। अस्य खण्डित भाग पाकिस्तान इति कथ्यते। पाकिस्तानस्य एक भाग पूर्वबगेषु अस्ति। द्वितीयश्च भाग पश्चिम पञ्चाम्बु देश[३]।

अस्माक देश ससारस्य देशेषु अति पुरातन[४] देश अस्ति। अय ज्ञानस्य धर्मस्य च आदिजन्मभूमि अस्ति। अत्रैव वेदाना प्रादुभाव बभूव। अत्रैव ऋषय ज्ञानस्य कर्मणश्च विकाश कृतवन्त। अत्रैव मानवसभ्यता सर्वप्रथम जन्म लेभे। इत. एव ससारे सर्वत्र सभ्यताया प्रचारो बभूव।

१ख—छोडते है। १—इस समय। २—अगरजो के। ३—पजाब में। ४—पराना।

एष देशः महापुरुषाणां प्रसिद्धं जन्मस्थानम् अस्ति। अत्र रामसदृशाः पितृभक्ताः बभूवुः। अत्र भरतसदृशा भ्रातरः अजायन्त। अत्र हरिश्चन्द्रसदृशाः सत्यवादिनः उत्पेदिरे। अत्र भीष्मसदृशा बालब्रह्मचारिणः बभूवुः। अत्र महावीरसदृशाः स्वामिभक्ता अभवन्। अत्र शिबि-दधीचि-सदृशा दानवीरा अभूवन्। अत्र बुद्ध-महावीर-सदृशा महात्मानः प्रादुर्बभूवुः। अस्य महिमा अवर्णनीयः अस्ति। अस्य गौरवम् अतुलनीयम् अस्ति।

अयम् एतादृशः गौरवशाली देशः भूत्वा अपि दुर्दैवशात् मध्ये परतन्त्रतां गतः आसीत् परन्तु सम्प्रति पुनरपि स्वतन्त्रतां लब्धवान् अस्ति। अस्य उत्कर्षाय सर्वैः अपि भारतवासिभिः जनैः प्रयत्नः कर्तव्यः।

१६—उत्तर प्रदेशः

अस्माकं देशः सम्प्रति द्वाविंशति[1] प्रदेशेषु विभक्तो वर्तते। कश्मीरान् गृहीत्वा त्रयोविंशतिः[2] प्रदेशा भवन्ति। एषु एकः प्रदेशः उत्तरप्रदेशः अस्ति। एतस्य पूर्वे बिहारप्रदेशः दक्षिणे मध्यभारतम्, पश्चिमे दिल्ली तथा उत्तरे नेपालराज्यं वर्तते।

भारतस्य सर्वेषु प्रदेशेषु अयं प्रदेशः विशालतमः अस्ति। एतस्य क्षेत्रफलं सम्प्रति ११२५२३ वर्गमीलपर्यन्तं वर्तते। अत्रत्या

१—आईस। २—तेईस।

जनसंख्या ५६,६४१,००० मिता वर्तते। एष प्रदेशः सम्प्रति पञ्चाशति[1] जनपदेषु (जिला) विभक्तः अस्ति। लखनऊ अस्य प्रदेशस्य राजधानी अस्ति।

अयं प्रदेशः यथा विशालतमः[2] अस्ति तथैव श्रेष्ठतमः[3] अपि अस्ति। बहोः प्राचीनकालात् एष प्रदेशः भारतीयसंस्कृतेः केन्द्रस्थानवर्तते। अत्रैव गंगा यमुनादयः पवित्रतमा नद्यः प्रवहन्ति। एष एव रामकृष्णादीनां जन्मभूमिः अस्ति। अस्मिन् एव प्रदेशे काशी प्रयागा दीनि तीर्थानि विराजन्ते। अत्रैव संस्कृतभाषायाः साहित्यस्य च विकासः समभवत्[4]। इत एव अनेके धार्मिकाः सम्प्रदायाः प्रचलिता बभूवुः।

राजनीतौ, शिक्षायां शिल्पे तथा वाणिज्यादि—विषयेषु अपि अस्य सम्प्रति महत्त्वपूर्णं स्थानं वर्तते। प० नेहरू प्रभृतीनां प्रसिद्धराजनीतिज्ञानाम् एष एव कार्यस्थानं वर्तते। अस्मिन् प्रदेशे सर्वप्रदेशेभ्यः अधिकाः विश्वविद्यालयाः सन्ति। अत्रैव संस्कृत-विद्यालयानाम् अपि संख्या अधिका वर्तते। ताजमहलप्रभृतीनि अनेकानि दर्शनीयस्थानानि अत्रैव विद्यन्ते।

शिल्पकलानाम् अपि कृते अस्मिन् प्रदेशे अनेकानि सुप्रसिद्ध-स्थानानि सन्ति। कानपुरस्य शाटिकाः[5], अलीगढस्य तालकानि[6], मिर्जापुरस्य मुरादाबादस्य च पात्राणि, आगरानगरस्य चर्मवस्तूनि, गाजीपुर—जौनपुरयोः सुगन्धितैलानि च सर्वत्र प्रसिद्धानि सन्ति। कानपुरं च अस्य प्रधानं व्यापारिकं नगरम् अस्ति।

एष प्रकारेण एष प्रदेशः अन्य प्रदेशापेक्षया महान्, श्रेष्ठः, सर्वगुणसम्पन्नः तथा भारतस्य हृदयस्वरूपश्च अस्ति।

१—पचास। २—बहुत बड़ा, सबसे बड़ा। ३—सबसे श्रेष्ठ। ४—हुआ। ५—साड़ियाँ। ६—ताले।

१७—हिमालयः

हिमालयः एकः पर्वतः अस्ति। अयं पर्वतेषु महान् पर्वतः अस्ति। अत एव अयं पर्वतराज इति उच्यते। अस्मिन् पर्वते हिमस्य[1] अधिकता अस्ति। तेन अस्य हिमालय इति नाम अस्ति।

अयं पर्वतः भारतस्य उत्तरदिशायाम् अस्ति। अयं महान् विशालकायः लम्बायमानश्च अस्ति। अस्य अनेकानि शिखराणि अतीव उच्चतमानि सन्ति। अस्य गौरीशंकरनामकं शिखरं संसारस्य सर्वेषु शिखरेषु उच्चतमं मन्यते[2]। अयं पर्वतः भारतस्य उत्तरदिशायाः महाबलवान् प्रहरी[3] इव बहोः कालात् अस्य देशस्य रक्षां कुर्वाणः अस्ति।

हिमालयस्य उपरि अनेके देशाः अनेकानि नगराणि च विद्यमानानि सन्ति। बहूनि वनानि उपवनानि च वर्तन्ते। अत्र अनेका जातयः निवसन्ति। अत्र नानाविधा वनस्पतयः, विविधानि फलानि तथा नानाप्रकाराणि खाद्यवस्तूनि च उपलभ्यते।

अस्मिन् पर्वते अनेकानि तीर्थस्थानानि च सन्ति। बहूनां मुनीनां तपोवनानि विद्यन्ते[4]। बहूनि अतिप्राचीनानि ऐतिहासिकस्थानानि वर्तन्ते। एवं प्रकारेण अयं पर्वतः महान् विशालः, महान् दीर्घः[5], महान् आश्चर्यकारकः तथा महान् उपकारी च अस्ति। अत एव संस्कृतग्रन्थेषु हिमालयस्य अतीव महत्त्वपूर्णं वर्णनं मिलति। महाकविना कालिदासेन "कुमारसम्भव"

१—बर्फ। २—माना जाता है। ३—पहरेदार। ४—गाये जाते हैं। ५—है। ६—लम्बा।

महाकाव्यस्य प्रथमसर्गे हिमालयस्य यत् मनोहरं वर्णनं विहितं वर्तते तत् पाठकैः अवश्यमेव पठनीयम्। तस्य इदं प्रथमं पद्यं विद्यते—

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः॥

१८—वाराणसी

अस्माकं देशे बहूनि तीर्थस्थानानि सन्ति। तेषु वाराणसी अपि एकं प्रसिद्धं तीर्थस्थानम् अस्ति। इदं काशीनाम्ना अपि प्रसिद्धं वर्तते।

वाराणसी अतीव प्राचीनतमं तीर्थस्थानम् अस्ति। अनेकेषु प्राचीनग्रन्थेषु अस्य महिमा वर्णित अस्ति। स्कन्दपुराणस्य काशीखण्डे अस्याः वाराणस्याः विस्तारेण वर्णनं विहितं वर्तते।

इयं नगरी गंगायाः पवित्रे तटे विराजमाना अस्ति। अत्रैव विश्वनाथस्य प्रसिद्धं सुवर्णमयं मन्दिरम् अस्ति। अन्यानि अपि बहूनि देवमन्दिराणि सन्ति। अत्र एकं मणिकर्णिका इति नामकं स्थानं वर्तते। अत्र दूरदूरात् आनीय[1] शवाः[2] दह्यन्ते[3]। अत्रैव एकं पिशाचमोचनं नाम तीर्थमस्ति यत्र यात्रिणः आगत्य पितॄणां श्राद्धक्रियां कुर्वन्ति। शिवरात्रिदिने अत्र विशेषरूपेण मेला

१—लाकर। २—मुर्दे। ३—जलाये जाते।

लगति। ग्रहणसमये अपि अत्र महान् जनसमुदाय एकत्र भवति। अत्र गंगाया स्नानाय श्रीविश्वनाथस्य दर्शनाय च सदैव भिन्न भिन्न प्रदेशेभ्य जना आगच्छन्ति।

वाराणसी भारतस्य सुप्रसिद्ध पुरातन विद्यापीठमपि अस्ति। अत्र यहो प्राचीनकालात् पठनपाठनयो परम्परा आगच्छति। अत्र अनेके विख्याता पण्डिता जाता सन्ति। अद्यापि अत्रत्याना पण्डितानां देशे विदेशे सर्वत्र प्रतिष्ठा भवति। विश्वविख्यातो हिन्दू विश्वविद्यालय अत्रैव विराजते। संस्कृत शिक्षाया प्रसिद्ध केन्द्र राजकीय संस्कृतमहा विद्यालयः अस्याः एव शोभा वर्द्धयति।

वाराणस्या गंगाया तीरे अनेके मनोहरा घट्टा सन्ति। बहूनि सुधाधवलितानि[४] शौधानि[५] च विराजन्ते यदा सायङ्काले तीरवर्तिषु[६] गृहेषु दीपा ज्वालयन्ते[७] तदा तीरे अतीव रमणीय दृश्य दृष्टिगोचर भवति।

अस्याः प्रसिद्धेषु घट्टेषु[८] सन्ध्याकाले महान् जनसमुदाय एकत्र भवति। तत्र केचन स्नान कुर्वन्ति। केचन सन्ध्यावन्दन कुर्वन्ति। केचित् कथा शृण्वन्ति। केचित् कीर्तन कुर्वन्ति। कोचत् गोष्ठीसुखम् अनुभवन्ति। केचित् नौकासु विहरन्ति। केचित् गंगाया दृश्यम् अवलोकयन्ति।

एव प्रकारेण वाराणसी अस्माक परम पवित्र तीर्थस्थानम्, विद्याया विश्वविख्यात केन्द्रम्, तुलसीदासस्य कबीरदासस्य च साधनाभूमि तथा मुमुक्षूणा मुक्तिदात्री नगरी अस्ति।

४–चूना से सफेद किये हुए। ५–महल, कोठियाँ। ६—किनारों पर के। ७–जलाये जाते है।८–घाटों पर।

१६—दीपावली

यथा होलिका हिन्दूनाम् एकं महत् पर्व वर्तते तथैव दीपावली अपि एकं महत् पर्व अस्ति। इदं कार्तिकमासस्य कृष्णपक्षे आश्वि अमावास्यायां भवति। अस्मिन् पर्वणि सर्वत्र विशेषरूपेण दीपाः आ ज्वाल्यन्ते। अत एव अस्य नाम दीपावली इति वर्तते।

अस्मिन् दिने सर्वे जना. स्व-स्व-गृहाणि परिष्कुर्वन्ति[1]। अन्तः[2] बहिः, नीचैः उपरि, पश्चात् पुरस्तात्[4], सर्वत्र सम्मार्जना[5] विधीयते[6]। केचन स्वगृहं मृत्तिकया लेपयन्ति केचन सुधया[7] लेपयन्ति। केचन नानाविधैः रङ्गैः[8] स्वगृहाणि भूषयन्ति[9]। बहवः पल्लव-पुष्पादिना अपि स्वगृहाणि अलङ्कुर्वन्ति[10]।

तत. सायंकाले सर्वे जनाः स्व-स्व-गृहे दीपान् ज्वालयन्ति। नगरनिवासिनः जनाः स्वस्व-गृहेषु विद्युद्वर्तिकाः[11] अपि प्रकाशयन्ति। गृहे, मन्दिरे, गोष्ठे[12], कूपे, अलिन्दे[13], द्वारे सर्वत्र दीपा. ज्वाल्यन्ते। अस्मिन् दिने चतुर्दिक्षु[14] दीपाः एव दृष्टिपथम्[15] आयान्ति[16]। सर्वाः दिशः, सर्वं गगनमण्डलं च प्रकाशमयं भवति।

अस्य दिनस्य सायङ्कालिकी शोभा अतुलनीया भवति,

शब्दार्थ—१—जलाये जाते हैं। २—साफ करते हैं। ३—भीतर। ४—आगे, सामने। ५—सफाई। ६—की जाती है। ७—चूना से। ८—सजाते हैं। ९—सुशोभित करते हैं। १०—बिजली की बत्तियाँ। ११—घोठा। १२—ओसारा, दालान। १३—चारो ओर। १४—नजरों के सामने। १५—आते हैं।

अवर्णनीया भवति। नगरेषु सर्वे जना अस्याः शोभायाः दर्शनाय परितः भ्रमन्ति।

अस्मिन् दिने रात्रौ लक्ष्मीपूजन भवति। तत्रापि वणिजः[१६] विशेषरूपेण लक्ष्मीपूजा कुर्वन्ति वार्षिक च आय-व्ययं[१७] गणयन्ति। बहव' जनाः स्वभाग्य परीक्षायै द्यूतक्रीडाम्[१८] अपि कुर्वन्ति। एतस्मिन् दिने बहवः जनाः नवीनानि पात्राणि वस्त्राणि च क्रीणन्ति[१९]।

अस्मिन् दिने रात्रिपर्यन्त जना जागरण कुर्वन्ति, परितः भ्रमन्ति, दीपमाला अवलोकयन्ति, खेलन्ति, मोदन्ते च। अस्या रात्रो रात्रे. अन्तिमे प्रहरे[२०] स्त्रिय शूर्पान्[२१] वादयित्वा[२२] गृहात् दरिद्रायाः निस्सारण कुर्वन्ति।

२०-होलिका

होलिका हिन्दूनाम् एक उत्सव अस्ति। अय महान् आनन्ददायी उत्सव. अस्ति। अय वसन्तोत्सव इत्यपि कथ्यते। अयम् उत्सव फाल्गुनस्य पूर्णिमाया तथा चैत्रकृष्णपक्षस्य प्रतिपदि भवति।

तत्र प्रथमदिने रात्रौ होलिकादाहः भवति। सर्वे जनाः स्वस्वग्रामे एकत्र[1] काष्ठादि सञ्चय[2] कुर्वन्ति। तच रात्रौ सर्वे

१६—बनिया। १७—आमद और खर्च। १८—जुए का खेल। १९—खरीदते हैं। २०—पहर में। २१—सूपों को। २२—बजाकर।
१—एक जगह। २—लकड़ी आदि का संचय।

सम्मिल्य ज्वालयन्ति । अयम् एव विधिः होलिकादाहः कथ्यते ।

ततः द्वितीयदिने प्रातः धूलिवन्दनं भवति । जनाः धूलिं कर्दमं[३] च परस्परं प्रक्षिपन्ति[४] । बहवः अश्लीलशब्दान् अपि उच्चारयन्ति । अनेके अश्लीलगीतानि अपि गायन्ति । सर्वे जनाः उन्मत्ता.[५] इव[६] जायन्ते । सङ्घीभूय[७] सर्वे जनाः स्वस्वग्रामे गायन्तः वादयन्तः खेलन्तः हसन्तश्च सर्वतः भ्रमन्ति ।

ततः अपराह्णे सायंकाले वा अबीर-गुलालादिकं चलति । केचन शुष्कमेव अबीरगुलालं मुखे लगयन्ति । केचन जले मेलयित्वा पृष्ठिकया[८] चालयन्ति । गृहे गृहे सम्मिलित—रूपेण गीतानि गीयन्ते । अर्धरात्रि-पर्यन्तं गीतनाद्यादिकं चलति । अस्मिन् दिने अपूपादीनि[१०] नानाविधानि मिष्टभोज्यानि अपि भुज्यन्ते ।

अयं महान् आनन्ददायकः उत्सवः अस्ति । अस्मिन् दिने परदेशवासिनः अपि स्वस्वगृहम् आयान्ति । सर्वे जनाः वैरादिकं विस्मृत्य[११] परस्परं मिलन्ति । सर्वे सर्वेषां गृहे गच्छन्ति । शरीरं, वस्त्रं, गृहं, द्वारं सर्वम् अपि रङ्गमयं भवति । सर्वत्र हर्षस्य उल्लासस्य च साम्राज्यं भवति । गीतैः वाद्यैश्च समस्तं गगन-मण्डलम् आपूरितं भवति ।

अत एव होलिका हिन्दूनां सर्वप्रियः महोत्सवः अस्ति ।

३—कादों । ४—फेंकते हैं । ५—पागल । ६—समान । ७—संगठित होकर । ८—सूखा ही । ९—पिचकारी से । १०—पूआ वगैरह । ११—भूलकर ।

२१—सरस्वतीपूजा

सरस्वती अस्माकम् एका देवता अस्ति। इयं ज्ञानस्य देवता अस्ति। यथा शक्ते देवता दुर्गा अस्ति, सम्पत्तेः देवता लक्ष्मीः अस्ति तथैव ज्ञानस्य देवता सरस्वती अस्ति।

सरस्वत्याः चत्वारः हस्ता भवन्ति। तेषु एकस्मिन् हस्ते सा पुस्तकं धारयति, एकस्मिन् हस्ते मालां धारयति, एकस्मिन् हस्ते वीणां धारयति तथा एकेन हस्तेन वीणां वादयति।

सरस्वत्या वाहनं हंसः अस्ति। इयं पद्मासने तिष्ठति। इयं शुक्लानि वस्त्राणि धारयति। अस्याः मूर्तिः अतीव मनोहरा गम्भीरा शान्तिमयी प्रसन्नाकारा च भवति।

सरस्वती ज्ञानस्य अधिष्ठात्री देवता अस्ति। इयं ज्ञानमयी अस्ति। इयं ज्ञानं ददाति, अज्ञानं दूरीकरोति। इयं विवेकं ददाति, अविवेकं च निवारयति। इयं विद्यां ददाति अविद्यां च नाशयति।

अत एव सर्वे विद्योपासकाः सरस्वतीं सेवन्ते, सरस्वतीं प्रणमन्ति, सरस्वतीं पूजयन्ति, सरस्वतीं स्तुवन्ति[२] तथा सरस्वतीम् एव उपासते[३]।

सरस्वती एव विदुषां[४] विद्यार्थिनां च महामान्या देवता अस्ति। अत एव वसन्तपञ्चम्यां भारतस्य सर्वेषु अपि विद्यालयेषु महता समारोहेण सरस्वत्याः पूजा भवति।

यदा सरस्वती प्रसन्ना भवति तदा विद्यार्थिभ्यः विद्यां ददाति, बुद्धिं ददाति, विवेकं च ददाति। परं सरस्वती केन प्रकारेण

१—सवारी। २—स्तुति करते हैं। ३—उपासना करते हैं। ४—विद्वानों की।

प्रसन्ना भवति ? परिश्रमेण, अभ्यासेन, सदाचारेण, विनयेन, गुरुसेवया च। अत विद्याभिलाषिभि परिश्रमेण पठनीयम्, पठितस्य पुनः पुनः अभ्यासः कर्तव्यः, सदाचारस्य पालनं कर्तव्यम्, सर्वत्र विनयेन वर्तितव्यम् तथा गुरुजनाना सेवा कर्तव्या। इमानि एव सरस्वतीपूजायाः प्रधानानि सन्ति।

२२—दुर्गापूजा

श्रीदुर्गा हिन्दुसमाजस्य एका सुप्रसिद्धा देवता अस्ति। काली, चण्डी, दुर्गा, भगवती इत्यादीनि अस्याः अनेकानि नामानि सन्ति।

यथा सरस्वती ज्ञानस्य अधिष्ठात्री देवता अस्ति तथैव श्रीदुर्गा शक्ते. अधिष्ठात्री देवता अस्ति। अस्याः अष्टौ बाहव सन्ति। सर्वेषु हस्तेषु इयम् अस्त्र शस्त्राणि धारयति। सिहः अस्या वाहन वर्तते। तम् एव आरुह्य[1] इय देवी शस्त्रास्त्रै शत्रूणा दमन करोति। श्रीदुर्गासप्तशती पुस्तके विस्तारूपेण दुर्गाया· कथा लिखिता अस्ति।

अस्माक देशे दुर्गापूजायाः महान् प्रचार· अस्ति। तत्रापि महिलासमाजे विशेषरूपेण दुर्गापूजायाः प्रचारः अस्ति। ग्रामे ग्रामे दुर्गायाः मन्दिराणि वर्तन्ते। तत्र समये समये स्त्रियः गत्वा दुर्गायाः पूजन कुर्वन्ति। गीतानि गायन्ति। परिक्रमा कुर्वन्ति। मन्दिर प्रक्षालयन्ति[2]। पूजारूपेण विविधवस्तूनि समर्पयन्ति[3]। स्वकल्याणाय च नानाविधा प्रार्थनाः कुर्वन्ति।

१—चढ़कर। २—धोती है, साफ करती है। ३—चढ़ाती है।

नवरात्रे नव-दिन पर्यन्तं दुर्गादेव्याः विशेषरूपेण पूजा भवति। तदानीं गृहे गृहे दुर्गापूजा भवति। गृहे गृहे दुर्गागीतानि गीयन्ते। गृहे गृहे दुर्गापाठः भवति। नवरात्रस्य अन्ते महान् समारोहः भवति। अनेकेषु स्थानेषु मेला लगति। बहुषु नगरेषु महावीर-ध्वजः निस्सरति[४] एवं प्रकारेण सर्वसाधारण-समाजे दुर्गापूजायाः विशेषमहत्त्वं वर्तते। शक्तिप्राप्तये सर्वैः दुर्गायाः उपासना कर्तव्या।

२३—गङ्गा

गंगा भारतस्य एका महानदी अस्ति। इयं हिमालयात् पर्वतात् निर्गच्छति[१] ततः प्रयागम् आगत्य यमुना-सरस्वतीभ्यां मिलति। पुनः अनेकमार्गैः गच्छन्ती समुद्रे निपतति।

गंगा अर्वाणां पवित्रतमा नदी अस्ति। अस्याः शास्त्रेषु महान् महिमा वर्णितः अस्ति। गंगायाः जलम् अति पवित्रं मन्यते। गंगाजलस्य पानेन पापानि शुद्ध्यन्ति। गंगास्नानस्य अपि बहु महत्त्वं लिखितं वर्तते। अत एव असंख्या[२] जनाः प्रतिवर्षं गंगास्नानं कर्तुं गच्छन्ति। केचन हरिद्वारम् गच्छन्ति, केचन प्रयागम् गच्छन्ति, केचन काशीम् गच्छन्ति तथा केचन अन्यानि समीपवर्तीनि स्थानानि।

गंगायाः तटं पवित्रं तपोमयं च भवति। बहोः कालात् गंगातटे साधवः निवसन्ति। ते तत्र तपस्यां कुर्वन्ति ईश्वरस्य ध्यानं च कुर्वन्ति।

४—निकलता है। १—निकलती है। २—अनगिनत।

गगायाः जल स्वास्थ्यकरम् अपि भवति। गगायाः जलं कदापि कीटादिना दूषितं न भवति। गगाजलस्य पानेन, गगाजलस्य स्पर्शेण, गगाजले स्नानेन, गगातीरे निवासेन, गगावायुसंसर्गेण च महान् शारीरिकः लाभः भवति।

अस्याः तीरे अनेकानि नगराणि वर्तन्ते। तानि नगराणि व्यापारस्य प्रधानकेन्द्राणि सन्ति। यथा हरिद्वार, प्रयाग, काशी, पटना, मुगेर, भागलपुर, कलकत्ता। क्षेत्रसेचने[1] व्यापारकरणे च गगा अस्माकं बहु उपकारं करोति। एवं गगा लोके परलोके च उभयत्र[2] हितं करोति।

२४—मेला

मेला शब्दः अस्माकं समाजे अतीव प्रचलितः वर्तते। यत्र मेला लगति तत्र बहूनां स्त्रीपुरुषाणां समुदायः एकत्र भवति। अतएव बहूनां मिलनात् तस्य मेला इति नाम प्रसिद्धम् अस्ति।

ससारस्य प्रायः सर्वेषु अपि प्रदेशेषु मेला लगन्ति। अस्माकं देशे अपि विशिष्टाः सामान्याश्च अनेकाः मेलाः प्रसिद्धाः सन्ति। भारतवर्षस्य सकलाः अपि मेलाः प्रायेण धार्मिकेषु स्थानेषु, व्रतपर्वादिषु अवसरेषु च लगन्ति। यथा काश्यां शिवरात्रिसमयये, अयोध्यायां रामनवमीतिथौ, मथुरायां गोपाष्टमीतिथौ, जगन्नाथपुर्यां रथयात्रावसरे तथा प्रयागे कुम्भसमये च। एतदतिरिक्तं महत्यादिसमये काशी प्रयागादि—तीर्थक्षेत्रेषु अपि मेलाः लगन्ति।

१-खेतों के सींचने में। २-दोनों जगह।

मेलाः द्विविधाः भवन्ति। धर्मप्रधानाः व्यापारप्रधानाश्च। धर्मप्रधानासु मेलासु कुम्भमेला, व्यापारप्रधानासु मेलासु च सोनपुर मेला विशेषरूपेण प्रसिद्धा वर्तते। सोनपुर मेला तु समारस्य सुप्रसिद्धासु व्यापारिकमेलासु अन्यतमा कथ्यते।

सामाजिकजीवने मेलाना महान् उपयोगः अस्ति। मेलासु "आवश्यकवस्तूना क्रय विक्रयौ[1] भवतः। चित्रविचित्राणा वस्तूनाम् अवलोकन भवति। सभा सम्मेलनादिषु व्याख्यानानि श्रूयन्ते[2]। नव-नव प्रदेशाना परिचयः जायते। महापुरुषाणा दर्शन भवति। चिरवियुक्तानि[3] मित्राणि मिलन्ति। विविधदेवाना दर्शनस्य, गगादितीर्थेषु स्नानस्य च पुण्यफल लभ्यन्ते। मनोरञ्जनम्, बुद्धेः विकाश' व्यावहारिकता चेत्यादयः अपि अनेके लाभाः भवन्ति। परन्तु इमे सर्वे लाभाः तदैव' भवितुमर्हन्ति" यदा मेलासु सुप्रबन्धः सुव्यवस्था च स्यात्। अनेकासु मेलासु सुप्रबन्धस्य अभावः दृश्यते[4]। तेन क्वचित् चौरादीनाम उपद्रव', क्वचित् विषूचिकादि[5] रोगाणा प्रकोप', क्वचित् अग्निदाहस्य[6] दुर्घटना, क्वचित् स्वच्छताया अभाव, क्वचित् गमनागमने असौविध्यम्, क्वचित् स्थानस्य सकीर्णता, क्वचित् खाद्यपेयवस्तूना[7] अशुद्धता चेति नाविधाः दुर्व्यवस्था दृष्टिगोचरा भवन्ति। तेन जनतायाः महत् कष्ट भवति। अतः मेलाप्रबन्धकैः अधिकारिभिः तथा सुप्रबन्ध वर्तव्यः यथा जनतायाः किमपि कष्ट न स्यात्।

१—खरीद बिक्री। २—सुने जाते है। ३—बहुत दिनों से बिछुड़े। ४—कमी। ५—हो सकते है। ६—देखा जाता है। ७—हैजा आदि। ८—पवलती। ९—खाने-पीने की वस्तुओं का।

२५—वरयात्रा

यदा कश्चिद् वरः विवाहार्थं गच्छति तदा तेन सह अन्येऽपि बहवः जना गच्छन्ति। इयम् एव यात्रा वरयात्रा इति कथ्यते। अस्या यात्राया वरः प्रधानः भवति तेन अस्याः यात्रायाः वरयात्रा इति नाम अस्ति।

वरयात्रायां सर्वतः अग्रे मूलनेन सुन्दरेण च वेषभूषादिना सुसज्जितः वरः गच्छति। स शिविकायां[1] मनोहरे आसने उपविष्टः तिष्ठति। क्वचित् क्वचिद् वरः घोटकम्[2] अपि आरुह्य[3] गच्छन्ति। वरस्य पृष्ठतः अन्ये बन्धुबान्धवाः, सम्बन्धिनः, सुहृदः, भृत्यकर्मकराः, वाद्यवादकाः, गजाश्वादयश्च गच्छन्ति। सर्वप्रकारेण सुसज्जिता वरयात्रा वरस्य गृहात् गीतवाद्यपुरस्सरं महता समारोहेण समुल्लासेन च सह मङ्गलसमये मुहूर्ते निस्सरति।

कन्यायाः ग्रामस्य समीपे वरयात्रिकाणां[4] कल्यावर्तस्य[5] कृते एकं निश्चितं स्थानं भवति। अस्मिन् स्थाने सर्वे वरपक्षीयाः जनाः एकत्र भवन्ति भोजनं विश्रामादिकं च कुर्वन्ति। ततः यदा द्वारपूजायाः समयः आसन्नः[6] भवति तदा सर्वे वरयात्रिकाः जनाः वेषभूषादिभिः सुसज्जिताः भूत्वा कन्यागृहं प्रति गमनाय समुद्यताः भवन्ति।

इतश्च कन्यायाः द्वारं सम्यक् प्रकारेण स्वच्छीकृतं, गोमयादिना उपलिप्तं, हरिद्रया गोधूमचूर्णेन च चर्चितं, पल्लवपुष्पादिना

१—पालकी पर। २—घोड़े पर। ३—चढ़कर। ४—बरातियों के लिये। ५—कलेवा के। ६—समीप।

समलंकृतं, रङ्ग विरङ्गै कागदपत्रादिभिश्च परिशोभित भवति। तत्र पूर्वत एव सर्वे कन्यापरीक्षाया नरा नार्यश्च सुसज्जिताः सत्य वरस्य वरयात्रायाश्च अवलोकनार्थं समुत्सुकाः तिष्ठन्ति। ततश्च कन्याद्वारत किञ्चिद् दूरे उभयो वरकन्यापक्षयो मेलन घोटक धायन[७] च भवति। अनन्तर सर्वे वरपक्षीया जना त्वरितमेव विविधवाद्यैः गजाश्वादिवाहनश्च सह महता वेगेन अहमहमिकया[८] द्वारे समवेताः भवन्ति। ततः द्वारे गणेशादि-पूजन प्रारभ्यते। अस्मिन् अवसरे क्वचित् मङ्गलानि पठ्यन्ते, क्वचित् गीतानि गायन्ते, क्वचित् वाद्यानि वाद्यन्ते, क्वचित् च स्नेह-सौहार्द-पुरस्सर परस्पर मिलन्तः आलपन्तश्च जनाः दृश्यन्ते। एव च इद द्वारपूजाया. दृश्यम् अतीव रमणीय हर्षजनक हृदयाह्लादकर च भवति।

द्वारपूजानन्तर सर्वे वरपक्षीया जना तस्मिन् स्थाने गच्छन्ति यत्र एतेषा निवासाय वितानस्य[९] पटमण्डपादीना[१०] च प्रबन्धः भवति। तत्रैव दिनद्वय दिनत्रय वा वरयात्रा निवसति। तत एव विवाहस्य अङ्ग-भूतानि सर्वाणि कार्याणि सम्पद्यन्ते। अनन्तर सर्वेषु कार्येषु सम्पन्नेषु तृतीयस्मिन् चतुर्थे वा दिने वरयात्रा पुन स्वस्थान प्रति निवृत्ता भवति। इदमेव वर्तमानकालस्य वरयात्राया साधारण स्वरूप वर्तते।

७—घुड़दौड़। ८—होड से। ९—शामियाना। १०—राबटी।

२६-पाठशाला

यत्र बालका शिक्षकेभ्य पाठ पठन्ति सा पाठशाला कथ्यते। शिक्षासस्थासु पाठशाला प्रारम्भिकी शिक्षासस्था अस्ति। अत्रैव बालका अक्षरारम्भ कुर्वन्ति तथा प्राथमिकीं शिक्षा च प्राप्नुवन्ति।

एकस्या पाठशालाया अनेका कक्षा भवन्ति। एकैकस्या कक्षायाम् एकैक शिक्षक पाठयति। अत प्रत्यक पाठशालासु प्राय त्रय चत्वार पञ्च वा शिक्षका भवन्ति। तपु एक प्रधान शिक्षक भवति अन्ये च सहायकशिक्षका भवन्ति।

सर्वा पाठशाला प्रायेण दशवादनकाले[1] लगन्ति चतुर्वादन-काले[2] च समाप्ति गच्छन्ति। परन्तु अय शीतकालस्य नियम. अस्ति। ग्रीष्मकाले तु प्रात सार्ध षड्वादन काले[3] पाठशाला. उद्घाट्यन्ते[4] तथा सार्धदशवादनकाले[5] च पिधीयन्ते[6]।

यदा पाठशाला लगति तदा प्रारम्भे सर्वप्रथमम् ईश्वरप्रार्थना भवति। सर्वे बालक पक्ति बद्ध्वा[7] तिष्ठन्ति। तपु कश्चित् एक द्वौ वा बालकौ पूर्वं प्रार्थना गायत[8], तत्पश्चात् अन्य सर्वे बालका गायन्ति। ईश्वरप्रार्थनाया पश्चात् उपस्थितिनिदर्णना[9] भवति। तदनन्तर सर्वे बालका स्व स्व कक्षा गच्छन्ति, निजे निजे आसने उपविशन्ति, तथा पठन लेखन च प्रारभन्ते[10]।

१—दस बजे। २—चार बजे। ३—साढ़े छ बजे। ४—खोली जाती है। ५—साढ़े दस बजे। ६—बन्द की जाती है। ७—बाँध कर। ८—गाते है। ९—हाजिरी। १०—प्रारम्भ करते है।

भिन्न भिन्न कक्षासु भिन्न भिन्न विषयाणा पाठन भवति। क्वचित् साहित्यस्य, क्वचित् व्याकरणस्य, क्वचित् गणितस्य, क्वचित् इतिहासस्य, क्वचित् भूगोलस्य, क्वचित् चित्रकलाया तथा क्वचित् अन्यविषयाणा च। लेखनकलाया: तथा वाचन-कलाया: अपि शिक्षण भवति येन बालका: सुन्दरलेखने सुन्दर-वाचने च कुशला. भवेयु:।

मध्ये प्राय: एकवादनकाले पाठशालासु जलपानस्य कृते अवकाश.[11] भवति। तस्मिन् समये घण्टिका[12] वदति। यदा जलपानस्य घण्टिका वदति तदा सर्वे छात्रा: पठन लेखन च परित्यज्य[13] जलपान कर्तुं गच्छन्ति। तदानीं तपु केचन जलं पिबन्ति, केचन भोजन कुर्वन्ति, केचित् च विश्राम कुर्वन्ति। अन्ये च केचित् भ्रमन्ति, केचित् खेलन्ति, तथा केचित् अन्ये साधनै: मनोविनोद कुर्वन्ति। तत्पश्चात् अवकाशे समाप्ते पुन: पठितु स्वस्व-कक्षा छात्रा गच्छन्ति।

पुस्तकपठनातिरिक्त बालका कानिचित् अन्यानि अपि कार्याणि कुर्वन्ति येन तेषा मनोविनोदो भवति, श्रमशक्ति: वर्धते तथा शरीर च स्वस्थ तिष्ठति। तानि कार्याणि इमानि सन्ति—यथा—कृषिकार्यम्, पाठशालीय पुष्पवाटिकाया[14] सस्कार:[15], श्रमदानम्, खेलन गानादिक च।

चतुर्वादनकाले पाठशालाया. अवकाशो भवति। तस्मिन् समये सर्वे बालका: अवकाशस्य घण्टिका श्रोतु अतीव उत्सुका तिष्ठन्ति। यदा च घण्टिका वदति तदा सर्वे बालका: अतीव प्रसन्ना भवन्ति। तत: त्वरितमेव[16] स्वस्व पुस्तकानि, लेखनीं[17],

११—छुट्टी। १२—घटी। १३—छोड़कर। १४—फुलवारी की। १५—सफाई। १६—तुरन्त ही। १७—कलम।

मसीपात्रं[18], पट्टिकां[19], खटिकं[20] च गृहीत्वा ते स्वं स्वं गृहं गन्तुं प्रवृत्ताः भवन्ति तथा हसन्तः, खेलन्तः, धावन्तः, उच्छलन्तः[21] कूर्दमानाः[22], गायन्तः, वदन्तः विवदमानाश्च[23] शीघ्रमेव गृहं प्राप्नुवन्ति[24]।

२७—परीक्षा

विद्यार्थिनां योग्यतायाः परीक्षणं परीक्षा इति कथ्यते। परीक्षा छात्राणां बुद्धेः परिश्रमस्य च तोलनस्य[1] एका महती तुला[2] अस्ति। यदा विद्यार्थिना परीक्षा भवति तदा एव तेषां बुद्धेः, प्रतिभायाः, स्मरणशक्तेः, परिश्रमस्य, विद्यानुरागस्य, तथा लेखनशक्तेः सम्यक् परिज्ञानं भवति। अत एव परीक्षायाः परम्परा शिक्षायाः आरम्भकालात् एव आगच्छन्ती[4] विलोक्यते[5]।

परीक्षा द्विविधा[6] भवति, एका पाठशालीया अपरा[7] राजकीया[8] च। तत्र पाठशालीया परीक्षा पाठशालायाम् एव भवति। अस्याः परीक्षायाः सर्वां व्यवस्थां पाठशालीयाः अध्यापकाः एव कुर्वन्ति। इयं च पाठशालीया परीक्षा वर्षे त्रिवारं[9] भवति। एका त्रिषु मासेषु, एका षट्सु मासेषु तथा एका वर्षस्य अन्ते। इयं गृहपरीक्षा अपि उच्यते।

१८—दावात। १९—पटरी। २०—खड़िया। २१—उछलते हुए। २२—कूदते हुए। २३—लड़ते-झगड़ते हुए। २४—पहुँचते हैं।

१—तौलने की। २—तराजू। ३—अच्छी तरह। ४—आती हुई। ५—देखी जाती है। ६—दो प्रकार की। ७—दूसरी। ८—सरकारी। ९—तीनबार।

द्वितीया परीक्षा राजकीया भवति। राजकीयपरीक्षाया: सञ्चालनं व्यवस्था च राजकीया शिक्षा परीक्षा परिषद् [10] करोति। इयं परीक्षा गृहपरीक्षापेक्षया अधिका सुव्यवस्थिता, प्रामाणिकी मूल्यवती च अस्ति। य छात्रः अस्यां परीक्षायाम् उत्तीर्णः भवति स एव अग्रिमयक्षासु पठितुं शक्नोति।

इयं परीक्षा परिषद्द्वारा स्वीकृतेषु परीक्षाकेन्द्रेषु भवति। येषां छात्राणां यस्मिन् परीक्षाकेन्द्रे परीक्षा भवित्री [11] भवति तेषां नामानि तस्मिन् परीक्षाकेन्द्रे प्रेष्यन्ते [12]। तस्य परीक्षाकेन्द्रस्य अध्यक्षः तत्र तेषां तेषां विद्यार्थिनां परीक्षायाः व्यवस्थां करोति।

छात्राः निर्धारितसमये परीक्षा-कालीन परीक्षाकेन्द्रेषु उपस्थिताः भवन्ति। परीक्षाभवने प्रवेशाय यदा घण्टिका वदति तदा सर्वे छात्राः प्रवेशपत्रं गृहीत्वा परीक्षाभवने प्रविशन्ति निजं च स्थानम् अन्विष्य [13] तत्र उपविशन्ति। अनन्तरं च यदा द्वितीया घण्टिका वदति तदा तेभ्यः प्रश्नपत्राणि दीयन्ते। ततः छात्राः प्रश्नपत्रम् एकवारम् आद्योपान्तं पठित्वा विचार्य च उत्तरलेखनस्य आरम्भं कुर्वन्ति। परीक्षावसरे सर्वेषु परीक्षाभवनेषु एकैकः निरीक्षकः भवति यः तत्र निरीक्षणस्य कार्यं करोति। परीक्षासमये समाप्ते सति पूर्वम् एव वा छात्राः स्वां स्वाम् उत्तरपुस्तिकां निरीक्षकाय समर्प्य [14] परीक्षाभवनाद् बहिः [15] निस्सरन्ति [16]।

परीक्षावसरे परीक्षार्थिना कृते अनेके नियमाः भवन्ति येषां पालनं परमावश्यकं भवति। यथा—परीक्षार्थिभिः किमपि पुस्तकं पत्रं वा सह नेतुं न शक्यते, परीक्षार्थिनः परस्परं वार्तालापं कर्तुं न शक्नुवन्ति तथा एकः परीक्षार्थी अन्यपरीक्षार्थिनः लेखस्य

१०—बोर्ड। ११—होने वाली। १२—भेज दिये जाते हैं। १३—ढूँढ कर। १४—देकर। १५—बाहर। १६—निकल जाते हैं।

अनुकरणं कर्तुं न शक्नोति इत्यादि। एतेषां नियमानाम् उल्लघनं कुर्वन् पराजार्थी खण्डनीय भवति।

यदि एतेषां नियमाना कठोरतया पालन न स्यात् तर्हि परीक्षाया किमपि मूल्यमेव न भविष्यति। अत परीक्षाया मूल्यस्य महत्त्वस्य च रक्षणार्थं एषा नियमाना महती उपयागिता वर्तते। परन्तु महत दुखस्य अय विषय वर्तते यत् आधुनिका विद्यार्थिन एतेषा नियमाना पालने ध्यान न ददते। अनेके तु एतेषा नियमाना उल्लघने एव आत्मन गौरव मन्यन्ते। यदि परीक्षार्थिना किमपि नियमविरुद्ध कार्यं दृष्ट्वा कश्चित् निरीक्षक तत्र हस्तक्षेप करोति तदा तेन सह कलह कुर्वन्ति। अवसर लब्ध्वा तदुपरि आक्रमणम् अपि कुर्वन्ति। कदाचित् हत्यामपि कुर्वन्ति। एतादृशा घटना सम्प्रति साधारणी सवृत्ता[17] वर्तते। परन्तु छात्रसमाजस्य कृते अय महान् लज्जाया विषय अस्ति। ईदृशा निन्दनीय कार्यं कृत्वा छात्रा न केवलम् आत्मन एव हानिं कुर्वन्ति अत्युत सम्पूर्णस्य छात्रसमाजस्य मुख कलङ्कयन्ति।

विद्यार्थिनाम् अस्य दोषस्य प्रधान कारणम् इद वर्तते यत् आधुनिका छात्रा अध्ययने तु परिश्रम कर्तुं न इच्छन्ति परन्तु उत्तीर्णा भवितुम् अवश्यम् इच्छन्ति। अत एव ते उत्तीर्णतायै[18] अनुचितानाम् उपायानाम् अवलम्बन कुर्वन्ति। तत्र च यदि कश्चिद् बाधक भवति तदा तस्य उपरि कुपिता भूत्वा तेन सह अनेकान् दुर्व्यवहारान् कुर्वन्ति। अनके चौर्य-कुशला छात्रा अनुचितै उपाये परीक्षासु सफलता प्राप्नुवन्ति अपि। तथापि अय मार्ग विद्यार्थिना कृते श्रेयस्कर नास्ति। परीक्षार्थिभि परीक्षानियमाना पालन विधाय पराजाया भयात्रा रक्षणाया।

१७—हो गई। १८—उत्तीर्ण होने के लिये।

तथा च अध्ययने परिश्रम. कर्तव्यः यथा अनुचितोपायानाम् अवलम्बनं विनैव ते परीक्षायां सफलता प्राप्नुयुः[१६]।

२८-यात्रा

यात्राशब्दस्य साधारणः अर्थ. "गमनम्" अस्ति। तथापि अय शब्द दूरगमने एव प्रचलितः वर्तते। यदा कश्चित्[१] मनुष्य एकस्मात् स्थानात् कस्मिंश्चित्[२] दूरवर्तिनि स्थाने गच्छति तदा स यात्रा करोति इति कथ्यते। अत एव ये जनाः दूरदेशेषु भ्रमणार्थं गच्छन्ति ते "यात्रिणः" इति उच्यन्ते।

यात्रा अनेकं उद्देश्यै विधीयते[३]। केचन जना तीर्थेषु भ्रमणार्थं यात्रा कुर्वन्ति। केचन जनाः ऐतिहासिकस्थानाना निरीक्षणार्थं[४] यात्रा कुर्वन्ति। अन्ये जनाः प्राकृतिकाना दृश्याना दर्शनाय यात्रा कुर्वन्ति। एवमेव केचन विद्योपार्जनाय, केचन धनोपार्जनाय, केचन धर्मप्रचाराय, केचन विजयाय तथा केचन यशःप्राप्तये च यात्रा कुर्वन्ति।

यात्रायाः मानवजीवने बहु महत्त्व वर्तते। मनुष्यः केवलम् एकस्मिन् स्थाने स्थित्वा[५] सम्यक् उन्नति कर्तुं न शक्नोति। यदा स दूर दूर-देशेषु गच्छति, अनेकेषु स्थानेषु भ्रमति, अनेकैः पुरुषैः सह मिलति तथा अनेकानि च मनुष्यकृतानि आश्चर्य-

---

१६—पा जायें।

१—कोई। २—किसी। ३—की जाती है। ४—देखने के लिये। ५—रहकर। ६—अच्छी तरह।

जनकानि वस्तूनि स्वनेत्राभ्या पश्यति तदा तस्य बुद्धेः विकासो भवति, तस्य हृदये महत्त्वाकाङ्क्षा[७] उत्पद्यन्ते, तस्य कर्तृत्वशक्तिः[८] वृद्धिं गच्छति, तस्य उत्साहो वर्धते तथा स कामपि विशेषरूपेण उल्लेखनीयाम्[९] उन्नतिं करोति।

एतदपेक्षया यात्रया अन्ये अपि अनेके लाभाः सम्भवन्ति। मनुष्य यदा स्वस्थानं परित्यज्य दूरदेशं गच्छति तदा तस्य व्यवहारे कुशलता आयाति,[१०] परिचय वर्द्धते, सहनशीलता आगच्छति, मनोविनोदः जायते, तथा कष्टसहिष्णुता, आत्मनिर्भरता चेत्यादयः गुणा विकसिताः भवन्ति।

प्राचीनकाले दूरयात्रासु महती कठिनता आसीत्। मार्गाः विकटाः आसन्। वाहनानां[११] सुलभता न आसीत्। समय श्रम द्रव्यं च अत्यधिकं लगति स्म। तथापि बहव जना जलमार्गेण स्थलमार्गेण च देशादेशान्तरेषु भ्रमणं कुर्वन्ति स्म। बहव विदेशवासिनः पर्यटकाः[१२] नानानदीनदान् उत्तीर्य[१३], गिरिपर्वतान् उल्लङ्घ्य[१४], समुद्रान् च अतिक्रम्य अस्माकं देशं भ्रमणार्थम् आगतवन्तः[१५] सन्ति। अस्माकं देशस्य अपि बहवः जना ऋषयः, मुनयः, वणिजः[१६] सिद्धासः, धर्मप्रचारकाः, राजानः राजदूताश्च विदेशेषु गतवन्तः[१७] सन्ति। एवं च मानवसमाजे दूरयात्रायाः परम्परा बहोः कालात् आगच्छति। दूरयात्रा उन्नतिशील-मानवसमाजस्य कृते जीवनस्य एकः आवश्यकः कार्यक्रमः अस्ति।

७—महान् बनने की इच्छायें। ८—काम करने की शक्ति। ९—उल्लेख करने योग्य। १०—माहिर है। ११—सवारियों की। १२—पर्यटन करने वाले, घूमने वाले। १३—तैर कर, पार कर। १४—लाँघ कर। १५—आये। १६—व्यापारी। १७—गये।

इदानीं तु यात्रा अतीव सरला सम्पृक्ता वर्तते। मार्गाणां यानानां वा काचित् न्यूनता नास्ति। द्रव्ये सति अल्पकालेन जनः समस्ते अपि विश्वे स्मिन् भ्रमणं कर्तुं शक्नोति। जलमार्गेण, स्थलमार्गेण, आकाशमार्गेण वा मनुष्य स्वच्छन्द भ्रमणं कर्तुं पारयति अभीष्टं च कार्यं साधयितुं शक्नोति।

अत यात्राया सर्वेषु साधनेषु विद्यमानेषु मनुष्यैः अवश्यमेव यात्राद्वारा जायमानानां[17] विविधलाभानां प्राप्तये प्रयत्नः कर्तव्यः। साधनसम्पन्नाः अपि बहवः जनाः आलस्येन, कार्पण्येन, कष्टभयेन, गृहकार्यहानि-भयेन वा गृहाद् बहिः न निस्सरन्ति। ते गृहे स्थिताः एव परम सन्तोषं भजन्ते। परन्तु इमा कूपमण्डूक-सदृशीं[18] वृत्तिं[19] परित्यज्य आत्मनः विकासाय अवश्यमेव भ्रमणं विधेयम्।

२१—कृषकाणां दिनचर्या

ये कृषिं[1] कुर्वन्ति ते कृषकाः[2] कथ्यन्ते। अस्माकं देशः कृषिप्रधानः देशः अस्ति। अत्र कृषकाणां संख्या अधिका वर्तते। कृषकाः कृषिं कृत्वा जीवनोपयोगीनि बहूनि वस्तूनि उत्पादयन्ति[3]। तै एव वस्तुभिः सर्वे जना जीवन्ति। अतः समाजस्य जीवनं धारणं च कृषकाणाम् एव उपरि निर्भरं वर्तते।

१८—होने वाले। १९—कुएं के मेढक के समान अर्थात् संकुचित। २०—व्यवहार।

१—खेती। २—किसान। ३—उत्पन्न करते हैं।

कृषिः महता परिश्रमेण भवति। अतएव कृषकाणां दिनचर्या अतीव कठोरा श्रममयी च भवति। तेषां जीवने विश्रामाय मनोरञ्जनाय वा अतीव अल्पः अवसरः मिलति। कृषकाः प्रातःकालात् आरभ्य सायंकालपर्यन्तं कठिनं परिश्रमं कुर्वन्ति। रात्रौ अपि ते पूर्णरूपेण विश्रामाय शयनाय वा समयं न लभन्ते।

यदा रात्रेः किञ्चित् अवशिष्टः[4] भवति तदैव कृषकाः[5] उत्तिष्ठन्ति। उत्थाय ते रामनाम कथयन्ति। ततः गोष्ठं[6] गत्वा तत्रस्थितौ[7] बद्धान् पशून् मोचयन्ति[8]। मोचयित्वा च तान् पशून् ते भोजनस्थाने बध्नन्ति घासं बुसादिकं च खादयन्ति[9]। ये पशवः केवलं घासं बुसं वा न खादन्ति तेभ्यः ते हरितघासं[10], तुषं[11] कणादिकं[12] च ददते तथा लवणेन सह सक्तून्[13] अपि पाययन्ति[14]।

एवं च महता मनोयोगेन पशून् खादयित्वा, स्वयं च किञ्चित् प्रातराशं[15] कृत्वा कृषकाः ते स्व आवश्यके सामयिके च कार्ये संलग्नाः भवन्ति।

कृषकाणां कार्याणि ऋतोः अनुसारं भिन्न-भिन्नानि भवन्ति। यदा वर्षणस्य कालः[16] आगच्छति तदा ते मुद्गलेन[17] क्षेत्राणि[18] खनन्ति[19]। हलेन क्षेत्राणि कर्षन्ति[20]। द्वितीयां कुर्वन्ति[21]। तृतीयां[22] कुर्वन्ति। वप्त्रा कुर्वन्ति[1]। क्षेत्रेभ्यः तृण-कण्टकान्

४—बाकी। ५—थोड़ा। ६—खूँटा। ७—खोलते हैं। ८—घास, भूसा वगैरह। ९—खिलाते हैं। १०—हरी घास। ११—भूसी। १२—खली आदि। १३—सत्तू। १४—पिलाते हैं। १५—कलेवा, जलपान। १६—बोने का समय। १७—कुदारी से, फावड़े से। १८—खेतों को। १९—खोदते हैं। २०—जोतते हैं। २१—दुबारा जोतते हैं। २२—तिबारा जोतते हैं। १—बोवनी करते हैं।

दीनि अपसारयन्ति[२४] ततः शुभे मुहूर्ते बीजानि वपन्ति[२५]। बीजानि उप्त्वा[२६] क्षेत्रं कोदिशेन[२७] समीकुर्वन्ति[२८]। ततः मध्ये क्षेत्राणि सिञ्चन्ति[२९]। घास-तृणादिकं शोधयन्ति[३०]। मञ्चेषु[३१] उपविश्य क्षेत्राणि च रक्षन्ति।

यदा शस्यं परिपक्वं भवति तदा कर्तनस्य[३२] कार्यं प्रारभ्यते। सर्वे जनाः हस्ते हस्ते दात्राणि[३३], गृहीत्वाः क्षेत्रेषु गच्छन्ति। तेषु केचित् शस्यानि[३४] लुनन्ति[३५] केचित् पुञ्जानि[३६], बध्नन्ति[३७], केचित् च तानि खले[३८] आनयन्ति[३९]। खले आनीतेषु सर्व-सस्येषु तत्र मेधिं[४०] बद्ध्वा तथा अनेकान् बलीवर्दान् दामनि[४१] योजयित्वा शस्यानां[४२] कण्डनं भवति। ततश्च शूर्पादिभिः[४३] उत्पवनं[४४] भवति। अनन्तरं विशुद्धं धान्यं गृहे आनीयते[४५]।

वर्षाकाले कृषकाः धान्यानि वपन्ति। ततः पुरुषाः तथा स्त्रियः उभये अपि धान्यं रोपयन्ति। धान्यरोपणकाले स्त्रियः सामूहिकरूपेण रोपणगीतानि गायन्ति। तानि गीतानि अतीव मनोहराणि भवन्ति।

मध्याह्नकाले अनेके कृषकाः क्षेत्रेषु एव भोजनं कुर्वन्ति। तेषां स्त्रियः यथोपस्थितं भोजनं जलं च क्षेत्रेषु नयन्ति। ततः ते

२४—हटाते हैं। २५—बोते हैं। २६—बोकर। २७—हेंगी से। २८—बराबर करते हैं। २९—सींचते हैं। ३०—सोहते हैं, साफ करते हैं। ३१—मचानों पर। ३२—काटने का। ३३—हँसिया। ३४—फसल। ३५—काटते हैं। ३६—पूँज। ३७—बाँधते हैं। ३८—खलिहान में। ३९—पहुँचाते हैं। ४०—नेह। ४१—डोरी में। ४२—डोरी। ४३—सूप आदि से। ४४—ओसवनी। ४५—इकट्ठा करने का।

तत्रैव भोजनं कुर्वन्ति विश्राम च। तदनन्तरं पुनः कार्ये सलग्नाः भवन्ति।

उपरिलिखित—कार्यातिरिक्त घासादीना समाहरणस्य[४५] अपि महान् भारः कृषकाणा शिरसि भवति। ते स्वभोजनापेक्षया पशूना भोजनस्य प्रबन्ध प्रथमम् आवश्यक मन्यन्ते। तदर्थं प्रतिदिनम् अनेके पुरुषा. स्त्रिय. तथा बालका. क्षुरम्[४६] पिटक[४७] च आदाय घासकर्तनाय[४८] इतस्तत गच्छन्ति। कदाचित् वशपत्राणि[४९] त्रोटयन्ति[५०]। यदा इक्षूणा[५१] कर्तनस्य कालः समायाति तदा इक्षुपत्राणा कर्तनाय कृषकाः माघमासस्य भयङ्करे शीतकाले एक साधारण कर्पट[५२] शरीरे धृत्वा कम्पमानाः इक्षुक्षेत्रेषु गच्छन्ति। एव महता श्रमेण कष्टेन च पशूनाम् आहारस्य प्रबन्ध कुर्वन्ति।

इद सर्वं कार्यं दिने सम्पाद्य[५३] सायकाले कृषकाः किञ्चित् विश्राम कर्तुं समय लभन्ते। तस्मिन् समये केचित् विश्राम कुर्वन्ति, केचित् जलपान कुर्वन्ति, केचित् आवश्यकवस्तूनि लवणतैलादीनि क्रेतु[५४] विपणौ[५५] गच्छन्ति, केचित् च अवशिष्टानि कार्याणि एव सम्पादयन्ति। बहव स्नानम् अपि सायङ्काले एव कुर्वन्ति। तत. सायङ्कालस्य कृत्ये समाप्ते पुन रात्रौ बहुविलम्ब पर्यन्त विविधानि कार्याणि सम्पाद्य भोजन च कृत्वा शयन कुर्वन्ति।

इद कृषकाणा दिनचर्यायाः सामान्य स्वरूपं वर्तते। वस्तुतस्तु कृषकाणा बहूनि कार्याणि भवन्ति। ते अहोरात्र परिश्रमं

४६—खुरपी। ४७—खाँची। ४८—घास गढने के लिये। ४९—बाँस के पत्ते। ५०—तोडते हैं। ५१—ईखों के। ५२—कपड़ा। ५३—करके। ५४—खरीदने के लिये। ५५—बाजार में।

कुर्वन्ति। शीतम् आतपं[६] वा न गणयन्ति। बहूनि कष्टानि सहन्ते। तथापि तेषां कार्यस्य समाप्तिः न भवति।

एतादृशं घोरं परिश्रमं कुर्वाणाः[७] अपि कृषकाः सुखिनः न सन्ति इति दुःखस्य विषयो वर्तते।

२०—द्विचक्रिका (बाइसिकिल)

येन मनुष्याः यात्रां कुर्वन्ति यद् 'यानम्'[१] इति कथ्यते। यानानि बहुविधानि भवन्ति। तेषु एव यानेषु द्विचक्रिका अपि एकं यानं वर्तते। अस्य समाजे सम्प्रति महान् प्रचारः वर्तते।

अस्मिन् याने द्वे चक्रे भवतः। अतएव अस्य नाम द्विचक्रिका इति कथ्यते। एकं चक्रम् अग्रे भवति तथा एकं चक्रं पृष्ठे भवति। मध्ये एकः लौहदण्डः भवति येन उभे[२] अपि चक्रे सम्बद्धे[३] तिष्ठतः[४]। द्विचक्रिकायाम् एका लौहशृंखला[५] अपि भवति या पादके[६] पृष्ठचक्रे च संलग्ना भवति। यदा आरोहकः[७] आसने उपविश्य पादकं पादाभ्याम् आहन्ति[८] तदा लौहशृंखला चलति। तस्याः चलनेन चक्रे अपि चलतः।

अग्रिमे चक्रे द्वे हस्तके[९] भवतः। आरोही ते उभे हस्तके हस्ताभ्यां गृहीत्वा तथा वामेन पादकम् आक्रम्य[१०] आसने

५६—धूप। ५७—करते हुए।

१—सवारी। २—दोनों। ३—एक में जुड़े हुए। ४—रहते हैं। ५—लोहे की बनी हुई चेन। ६—पैडिल। ७—सवार, चढ़ने वाला। ८—मारता है। ९—हैन्डिल। १०—दबा कर।

उपविशति। ततश्च पादाभ्या द्विचक्रिका चालयति। आरोही इच्छानुसार मन्द मन्द वेगेन च द्विचक्रिका चालयितु शक्नोति।

द्विचक्रिका वेगेन चलति। अतः अग्रे चलता जनानाम् अपसरणाय[10] पूर्वमेव सूचनाप्रदानस्य आवश्यकता भवति। तदर्थं द्विचक्रिकाया दक्षिणे हस्तके एका घण्टिका आबद्धा[11] भवति। ताम् एव घण्टिका वादयित्वा[12] आरोहिण[13] अग्रे चलत पथिकान् अपसर्तुं[14] सूचना ददते।

यदि कश्चिद् बधिर पथिक घण्टिकावादन न शृणुयात्, अथवा कश्चित् अबोध बालक मार्गे आपतेत्[15] अथवा अन्यैः जने सह सघर्षस्य सम्भावना स्यात् तदा चलन्त्या द्विचक्रिकाया अवरोधनम्[16] अपि परमावश्यक भवति। एतदर्थं द्विचक्रिकाया एक गमनप्रतिरोधक[17] यन्त्रशकल[18] भवति। तद् उभयो. अपि चक्रयो सम्बद्ध भवति। तद्द्वारा आरोहिण चलन्तीं द्विचक्रिकाम् अवरुध्य[19] नीचै. अवतरन्ति[20] तथा दुर्घटनातः आत्मान पर च रक्षयन्ति।

अयमेव द्विचक्रिकाया सामान्य परिचय अस्ति। अधिकाश-जनाना कृत इद यान महत् उपकारक वर्तते। अस्मिन् अनेके लाभाः सन्ति। प्रथमत. इद बहु महर्घं[21] नास्ति। द्वितीयत एतद् द्वारा अल्पसमयेन बहुदूरपर्यन्त गन्तु तथा आगन्तु शक्यते। एक समर्थ पुरुषः अनेन यानेन एकेन दिनेन २०–२५ क्रोशपर्यन्त गन्तु पारयति। तृतीयत एतस्य रक्षणे प्रतिदिन

११—हटाने के लिये। १२—बँधी हुई, लगी हुई। १३—बजा कर। १४—सवार। १५—हटने के लिए। १६—आ पड़े। १७—रोकना। १८—चाल रोकने वाला। १९—पुर्जा। २०—रोक कर। २१—उतर आते हैं। २२—महँगा।

कश्चिद् व्ययः अपि नास्ति। न इदं अश्वादिवत् घासं भक्षयति न च मृत्तिरवत्[२१] तैलमेव पिबति। न वा एतस्य सेवायै कस्यचित् भृत्यस्य प्रयोजनं भवति। चतुर्थतः एतस्मात् किमपि भयं अपि न भवति। न इदं बलीवर्द[२२] इव शृङ्गाभ्यां हन्ति न च अश्व इव दन्तैः दशति[२३]। हस्ती इव भयानकः अपि न भवति। पञ्चमतः एतद्द्वारा अग्रे पृष्ठे च धृत्वा बहूनि वस्तूनि अपि जनः नेतुं शक्नोति तथा एकं द्वयं वा जनमपि वोढुं[२४] शक्नोति।

इमे सर्वे द्विचक्रिकायाः जायमाना. लाभाः सन्ति। एभिः कारणैः येषां जनानां कृते सर्वदा इतस्ततः गमनागमने आवश्यके भवतः तेषां कृते एतत्समानं सुविधाजनकं किमपि अन्यद् यानं नास्ति। अनेन यानेन छात्राः, अध्यापकाः, पर्यटकाः[२७], प्रचारकाः, सामाजिकाः कार्यकर्तारः, साधारणाः अधिकारिणः, भृत्याः, चिकित्सकाः, पत्रवाहकाः[२८], तथा अन्ये च जनाः महता सुखेन सौविध्येन च यथेच्छं भ्रमन्ति स्वकार्यं च सम्पादयन्ति। यदि इदं यानं न अभविष्यत् तर्हि गमनागमनयोः महती असुविधा अभविष्यत्।

अतः येन इदं यानं निर्मितं तेन जगतः महान् उपकारः कृतः। नमो नमः तस्मै महापुरुषाय अनेक-जन—जीवन—सहायकाय।

२१—मोटर। २२—बैल। २३—काटता है। २४—ढोने को।
२७—घुमक्कड़। २८—चिट्ठी ढोने वाला, डाकिया।

३१—वाष्पशकटम् (रेलगाड़ी)

यानायाः यानि अनेकानि साधनानि सम्प्रति प्रचलितानि सन्ति तेषु एक साधनं वाष्पशकटम् अपि अस्ति। इद साधनं सर्वापेक्षया श्रेष्ठतरं सुगमतर च अस्ति।

इदं शकट[1] वाष्पद्वारा[2] चलति अत एव वाष्पशकटं कथ्यते। एतस्मिन् अग्रे[3] शकटवाहक[4] वाष्पयन्त्र[5] भवति। ततश्चात् परस्पर सम्बद्धाः[6] अनेकाः सम्पुटकाः[7] भवन्तियान् आरुह्य[8] मनुष्याः यात्रा कुर्वन्ति। एषु सम्पुटकेषु जनानाम् उपवेशनाय वस्तूना स्थापनाय च स्थानानि निर्मितानि भवन्ति। प्रत्येकं सम्पुटके प्रवेशाय निर्गमनाय च उभयोः[9] पार्श्वयोः[10] द्वाराणि तथा वायो प्रकाशस्य च आगमनाय अनेकानि वातायनानि[11] अपि भवन्ति। प्रतिसम्पुटकं विद्युत्प्रकाशस्य[12] विद्युद्व्यजनस्य[13] तथा मूत्रपुरीषोत्सर्ग स्थानस्य[14] च व्यवस्था भवति।

इदं वाष्पशकटं भूमौ न चलति प्रत्युत भूम्या उपरि निर्मिते पट्टद्वयात्मके[15] लौहमार्गे[16] चलति। प्रत्येकं सम्पुटकस्य नीचैः चत्वारि चक्राणि भवन्ति। तानि चक्राणि

१—गाड़ी। २—भाफ द्वारा। ३—गाड़ी ढोने वाला। ४—इन्जिन। ५—जुड़े हुए। ६—डिब्बे। ७—चढ़कर। ८—दोनों। ९—बगल। १०—खिड़कियाँ। ११—बिजलीबत्ती। १२—बिजली का पंखा। १३—पेशाब और पैखाने का स्थान। १४—दो पटरी वाले। १५—लोहे के मार्ग पर।

भूम्याः उपरि विच्छादितयोः[१५] लौहपट्टयो उपरि चलन्ति। इमौ लोहपट्टौ अतीव दृढौ पुष्टौ च भवतः।

वाष्पशकटस्य विरामाय[१७] त्रिचतुरेषु क्रोशेषु एकैकम् अवस्थानम्[१८] भवति। तत्र नियतसमये वाष्पशकटम् आगत्य विरमति। शकटस्य आगमनात् पूर्वम् एव यात्रिणः चिटिका[१९] गृहीत्वा शकटे आरोहणाय[२०] सन्नद्धाः तिष्ठन्ति। यदा शकटम् आगत्य अवस्थानं विरमति तदा यात्रिणः यथास्थानम् आरोहन्ति। ये च तत्र अवरोहकाः[२१] भवन्ति ते तत्र अवरोहन्ति[२२]। अन्ये च यात्रिणः तत्र अवरुद्ध[२३] खाद्यवस्तूनि विक्रीणन्ति[२४], जलपानं कुर्वन्ति, इतस्ततः भ्रमणेन मनोविनोदं कुर्वन्ति तथा आयासं[२५] दूरीकुर्वन्ति। ततः विरामसमये समाप्ते पुनः शकटे अग्रिम अवस्थानं प्रति प्रस्थिता भवति। सम्पूर्णे देशे एव प्रकारेण अहोरात्रं[२६] वाष्पशकटस्य गमनागमनं चलति।

इदं वाष्पशकटं लोकानां कृते यात्रायै सर्वोत्तमं साधनं वर्तते। अस्मिन् याने अपेक्षितानि सर्वाणि सुखसाधनानि विद्यमानानि भवन्ति। अद्यावधि[२७] या काश्चन त्रुटयः आसन् तासां पूर्तये अपि वर्तमानप्रशासनस्य[२८] सचारविभागः[२९] पूर्णतया चेष्टमानः वर्तते। सम्प्रति अवस्थाने अवस्थाने जलस्य, मृत्तिकायाः, विश्रामागारस्य, छायायाः, प्रकाशस्य च समुचितं प्रबन्धः क्रियमाणः वर्तते। शकटे अपि प्रकाशस्य, व्यजनस्य,

---

१५—बिछाये हुए। १७—रुकने के लिये। १८—स्टेशन। १९—टिकट। २०—चढ़ने के लिये। २१—उतरने वाले। २२—उतरते हैं। २३—उतर कर। २४—बेंचते हैं। २५—थकावट। २६—दिन-रात। २७—आज तक। २८—सरकार का। २९—रेलवे विभाग।

शयनस्थानस्य, स्वच्छताया, जलस्य च पूर्वापेक्षया शोभना व्यवस्था क्रियमाणा वर्तते। दूरयात्रिणा, स्नानाणा, शिक्षकाणा तथा भृतिकराणा[10] जनाना शुल्केऽपि सुविधा विहिता वर्तते। श्रमे च अनेकानेक-सुखसौविध्य-सम्पादनस्य योजना वर्तते इति समाचारपत्रेषु पठयाम।

वाष्पशकटद्वारा यात्राकरणे महत आनन्दस्य अपि अनुभव. भवति। सुदूरयात्राया यदा वय नानाविधानि वस्तूनि पश्याम, नानाविधै. पुरुषै. सह मिलाम, नानाविधा. भाषा शृणुम, नानाविधा वेषभूषा अवलोकयाम तथा महता वेगेन वर्धमाने वाष्पशकटे वातायनेन यदा क्षणे क्षणे नूतननूतनाना नदनदीनाम्, गिरिपर्वतानाम्, तरुलतानाम्, पशुपक्षिणाम्, तथा ग्रामनगराणा साक्षात्कार कुर्म तदा महान् आनन्द अनुभूयते। तस्मिन् समय वाष्पशकट परित्यज्य अन्यत्र गन्तुम् इच्छा न भवति।

परन्तु एभि गुण सह वाष्पशकटे केचन दोषा अपि सन्ति। यथा वाष्पशकटेषु परस्पर सङ्घर्ष, तेषा पट्टाद्[11] अवतरणम्[12], गमनागमनसमयस्य उल्लघनम्, चौराणाम् मेलादिषु महान् सम्मर्द[13] तथा क्वचित् क्वचित् जलादीना दुर्व्यवस्था चेति। यदि इमा बाधा न स्यु तदा वाष्पशकट-यानिणा कृते महत् सुखकर गमनसाधन भविष्यति।

१०—बोली करने वाले। ११—पटरी से। १२—उतरना।
१३—भीड़।

३२—रामलीला

रामलीला एकप्रकारेण श्रीरामचन्द्रस्य अशेष[1] चरितानाम् अभिनयः[2] अस्ति। अस्याः अस्माकं देशे महान् प्रचारः अस्ति। भारतस्य प्रायः सर्वेषु नगरेषु रामलीलायाः अभिनयः भवति। अनेके ग्रामीणाः[3] अपि स्वस्वग्रामेषु रामलीलायाः आयोजनं कुर्वन्ति।

रामलीला प्रायेण आश्विनमासे भवति। रामलीलायां रामायणे वर्णितस्य सम्पूर्णस्य रामचरितस्य अभिनयः भवति अतः अस्याः पूर्तौ[4] बहूनि दिनानि लगन्ति। यत्र जनानां साधनानां च न्यूनता[5] न भवति तत्र एकमासात् अपि अधिक-काल-पर्यन्तं रामलीला चलति। रामलीलायाः समस्तः अभिनयः संवादश्च श्रीरामचरितमानसानुसारं भवति। एकः वाचकः रामायणं वाचयति[6] तदनुसारं च सर्वाणि पात्राणि स्वं स्वं कार्यं सम्पादयन्ति। मध्ये मध्ये आवश्यकतानुसारं गीत-वाद्यादीनाम् अपि कार्यक्रमः संचलति। समाजे मनोरञ्जनेन सह धार्मिक-शिक्षायाः प्रचारः रामलीलायाः प्रधानम् उद्देश्यं वर्तते।

सामान्यजनतायाः हृदये नीरसेन ज्ञानोपदेशेन तथा धार्मिक-भावना न उत्पद्यते[7] यथा सरसेन अभिनयादिना उत्पद्यते। धर्मस्य शुभम् अधर्मस्य च अशुभं परिणामं दृष्ट्वा दर्शकानां हृदये स्वतः एव धर्माचरणं प्रति अभिरुचिः भवति। अतएव नाट्यद्वारा

१—सम्पूर्ण। २—नाटक। ३—ग्रामवासी, देहाती। ४—पूरा करने में। ५—कमी। ६—बाँचता है। ७—उत्पन्न होता है।

मनोरञ्जनेन सह सुशिक्षाप्रचारस्य परम्परा बहोः कालात् आगच्छति। रामलीला अपि ईदृशमेव एकं साधनं वर्तते येन जनतायाः मनोरञ्जनम् अपि भवति तथा श्रीराम-सीता-लक्ष्मण-भरत-महावीर-प्रभृतीनां महापुरुषाणां जीवनेव अत्युत्तमा शिक्षा अपि मिलति।

मानवसमाजस्य लोक-परलोक-हिताय तथा सर्वाङ्गपूर्णा शिक्षा श्रीरामादीनाम् आदर्शचरितेभ्यः मिलति न तथा अन्येन केनापि उपायेन। पुत्रस्य पित्रा तथा मात्रा सह, भार्यायाः पत्या सह[८] स्नुषायाः[९] श्वश्वा[८] सह, सेवकस्य स्वामिना सह, प्रजायाः राज्ञा सह, मनुष्य च मनुष्येण सह कीदृशः व्यवहारः समुचितः इति विषये रामचरितात् उत्कृष्टतमा शिक्षा मिलति। अनया दृष्ट्या भारतीयसमाजे रामायणस्य रामलीलायाश्च महती उपयोगिता वर्तते।

परन्तु खेदस्य अयं विषयः वर्तते यत् सम्प्रति भारतीय-जनतायाः यथा सिनेमादिषु अनुरागः वर्तते तथा परम्परागतेषु रामलीलादिषु अभिनयेषु न वर्तते। अतएव ते इमानि प्राचीनानि मनोरञ्जन-साधनानि उपेक्षादृष्ट्या अवलोकयन्ति। परन्तु एषा प्रवृत्तिः देशस्य कृते कल्याणकरी नास्ति। रामलीलाद्वारा समाजस्य यत् कल्याणं सम्भवति तत् सिनेमाद्वारा जन्मशतेन अपि न सम्भवति। अतः प्राचीनेषु शिक्षाप्रदेषु मनोरंजन-साधनेषु पुनः ध्यानदानस्य तेषां बहुलरूपेण प्रचारस्य च महती आवश्यकता वर्तते। विशेषतश्च अस्मिन् धर्मस्य नैतिकतायाश्च भयङ्करे ह्रासससमये।

८—पुत्रवधूका। ९—सास से।

३३—कन्दुक-क्रीड़ा

कन्दुकेन[1] या क्रीडा भवति सा कन्दुकक्रीडा कथ्यते। क्रीडाः द्विविधा भवन्ति। गृहक्रीडाः बहिःक्रीडाश्च। गृहे उपशिरय याः क्रीडा क्रीड्यन्ते[2] ताः गृहक्रीडा इति उच्यन्ते। गृहाद् बहिः विस्तृते क्रीडाप्राङ्गणे याः क्रीडाः क्रीड्यन्ते ताः बहिः क्रीडा इति उच्यन्ते। खेलनम्, कूर्दनम्, धावनम्, उल्लम्बनम्[3] कपर्दी[4], कन्दुकम्, पादकन्दुकम्[5] तथा वीटा[6] इत्यादयः क्रीडाः बहिः क्रीडाः सन्ति।

कन्दुकक्रीडा अस्माकं देशस्य अतिप्राचीना तथा अतिप्रिया क्रीडा अस्ति। संस्कृतसाहित्यस्य अनेकेषु ग्रन्थेषु स्त्रीपुरुषाणां कन्दुकक्रीडायाः अतीव मनोहरं वर्णनं मिलति। प्राचीनसमये कन्दुकक्रीडा-विषये "कन्दुकतन्त्र" नामक एकः महान् ग्रन्थः अपि आसीत्। अनेन ज्ञायते यत् अस्माकं देशस्य क्रीडासु कन्दुकक्रीडायाः कियत् महत्त्वपूर्णं स्थानम् आसीत।

अस्मिन अपि समये कन्दुकक्रीडायाः महान् प्रचारः अस्ति। ग्रामे ग्रामे, गृहे गृहे, विद्यालये विद्यालये च सर्वत्र बालकाः विद्यार्थिनश्च कन्दुकेन पादकन्दुकेन च खेलन्ति। अस्य खेलस्य प्रतियोगितायाः अपि अनेकेषु स्थानेषु प्रतिवर्षम् आयोजना भवति यत्र महता उत्साहेन बहवः खेलकाः दर्शकाश्च सम्मिलिताः भवन्ति।

१—गेंद से। २—खेली जाती है। ३—उछलना। ४—कबड्डी। ५—फुटबाल। ६—क्रिकेट।

अस्मिन् खेले खेलकाना द्वे दले भवत । एकस्मिन् एकस्मिन् दले दश दश खेलका भवन्ति। उभयोः दलयो मध्ये एक· मध्यस्थ भवति य क्रीडासमये सुव्यवस्था करोति, अव्यवस्था वारयति, नियमनिर्देश करोति तथा विवादे समुपस्थिते मध्यस्थता करोति।

कन्दुकक्रीडया तथा अन्याभिः अपि क्रीडाभि क्रीडकाना महान् लाभ भवति। क्रीडने धावनादिना शरीरस्य बल वर्द्धते, स्फूर्ति आयाति, शक्तिसञ्चय भवति, श्रमशक्ति वृद्धि गच्छति, अगप्रत्यगानि च सुपुष्टानि भवन्ति। क्रीडनेन शारीरिकशक्त्या सह बुद्धे अपि विकास· भवति। क्रीडने हि परपक्षस्य पराजयाय पदे पदे चतुरतायाः, निपुणतायाः, सूक्ष्मदर्शिताया तथा प्रत्युत्पन्न मतित्वस्य आवश्यकता भवति। एतद्व्यतिरिक्त क्रीडनेन अन्येषामपि मानवोचितगुणाना विकासाय अवसरो मिलति। ते च गुणाः इमे सन्ति। यथा—आज्ञापालनम्, अनुशासन, नियता, परस्पर प्रीति, कष्ट सहिष्णुता, सहनशीलता, साहसम्, पारस्परिकः सहयोग·, व्यवहार कुशलता च इति। मनोरजन च क्रीडाना सर्वसाधारण. लाभः अस्ति।

अनेन प्रकारेण कन्दुकादिक्रीडा· मानवसमाजस्य, विशेषरूपेण नवयुवकाना विद्यार्थिना च महान्त उपकार कुर्वन्ति। सर्वे बालकाः युवान विद्यार्थिनश्च यदि क्रीडाकुशलाः भवेयु तदा तेषा समाजस्य च स्वास्थ्यदृष्ट्या महान् लाभो भविष्यति इति सुनिश्चित वर्तते।

३४—डाक-विभागः

राज्यद्वारा जनतायाः हिताय यावन्तः[1] विभागाः सञ्चालिता सन्ति तेषु डाकविभागः अपि एकः जनतायाः कृते महान् हितकारी विभागः अस्ति। यदि अयं विभागः न स्यात् तर्हि जनतायाः जीवने महती कठिनता असुविधा च आपद्येत[2]।

डाकविभागस्य चत्वारि कार्याणि मुख्यतमानि भवन्ति। यथा—पत्राणां प्रेषणम्[3], तन्त्रीद्वारा[4] अतिशीघ्रतया समाचाराणां प्रेषणम्, मूल्यप्रेषद्वारा[5] मूल्यकाणां प्रेषणव्यवस्था, राजेष्ट्रिकरणम्[6] तथा जनतायाः द्रव्यस्य सरक्षणं च।

इमानि सर्वाणि अपि कार्याणि जनतायाः कृते नितान्तम् आवश्यकानि सन्ति। तथाहि—लोके बहवः जनाः भिन्न भिन्न-कार्यवशात् दूरं दूरं गच्छन्ति दूरदेशेषु च निवसन्ति। अनेके जनाः अनेकवर्षपर्यन्तं परदेशे एव निवासं कुर्वन्ति। यदि डाकद्वारा पत्रप्रेषणस्य व्यवस्था न अभविष्यत्[7] तर्हि कथं ते स्वगृहस्य समाचारम् अज्ञास्यन्[8] कथं वा स्वकीयं समाचारं गृहजनेभ्यः अज्ञापयिष्यन्[9]? अथ च यदि कदाचित् काचित् दुर्घटना जायते, त्वरितं वा क्वचित् समाचारप्रेषणस्य आवश्यकता भवति तदा तन्त्रीद्वारा बहु दूरेऽपि शीघ्रातिशीघ्रम् समाचारः प्रेषयितुं शक्यते। एवं च दूरवर्तिनां जनानां मध्ये समाचारप्रापण-द्वारा एष विभागः जनतायाः महतीं सेवां करोति।

१—जितने। २—हो जाय, आ जाय। ३—पहुँचाना। ४—तार द्वारा। ५—मनीआर्डर द्वारा। ६—रजिष्ट्री करना। ७—होती। ८—जानते। ९—जनाते।

एवमेव रुप्यप्रैषद्वारा रुप्यकप्रेषणेन अपि अयं विभागः लोकाना महदुपकार करोति। अनेके जनाः दूरदूरदेशान् गत्वा विविधानि च कार्याणि कृत्वा द्रव्योपार्जन कुर्वन्ति तथा तेन एव च द्रव्येण स्वपरिवार पोषयन्ति। तेषा परिवारस्य जीवनं तेषाम् एव द्रव्यस्य उपरि निर्भर भवति। "कदा रुप्यकाणि आगमिष्यन्ति, कदा रुप्यकाणि आगमिष्यन्ति" इति ते दिवानिश रुप्यकाणि प्रतीक्षमाणाः तिष्ठन्ति। यदा च वाह्यस्था जनाः मासिकवेतन लब्ध्वा[९] तस्य रुप्यप्रैषद्वारा द्रव्य प्रेषयन्ति तदा तेषा जीवनस्य अवलम्बन भवति। यदि डाकद्वारा रुप्यकप्रेषणस्य ईदृशी समुचिता व्यवस्था न अभविष्यत् तर्हि अनेके कुटुम्बिनः द्रव्य विना महतीं दुर्दशा प्राप्स्यन्।

एवमेव निश्चयेन[१०] सुरक्षापूर्वक विविधवस्तूना यत्र तत्र प्रेषणेन तथा धनिकाना द्रव्यसरक्षणेन च लोकस्य महान् लाभः भवति। एव च डाकविभाग द्वारा क्रियमाणै[११] सर्वै. अपि यैर्यं जनताया महती सेवा विधीयते इदत्र नास्ति कश्चित् सन्देहः।

पूर्वं दूरे दूरे पत्रालया[१२] आसन्[१३]। एतेन लोकाना कृते अवश्यमेव काचित् असुविधा आसीत्। परन्तु सम्प्रति पत्रालयाना सख्या पूर्वापेक्षया अतीव वृद्धि गता वर्तते। एवमेव तन्त्रीगृहाणाम्[१४] अपि सख्या सम्प्रति पूर्वापेक्षया अधिका जाता वर्तते। पूर्वं पत्रवाहका[१५] पदातय[१६] एव दूरे दूरे पत्राणि आपयन्ति स्म[१७] परं सम्प्रति यानद्वारा अपि पत्रापणस्य व्यवस्था विधीयमाना[१८] वर्तते। बहुषु प्रधानेषु नगरेषु वायुयान-

१०—पाकर। ११—रजिष्ट्री के द्वारा। १२—किये जा रहे। १३—डाकखाना। १४—ये। १५—डाक घर। १६—बाबिया। १७—पैदल। १८—पहुँचाते। १९—भी जा रही।

द्वारा अपि पत्रप्रेषणस्य व्यवस्था विहिता वर्तते। एवं प्रकारेण अस्य विभागस्य सर्वेषु क्षेत्रेषु दिने दिने गौरिव्यं वर्धमानं विलोक्यते।

इय देशस्य अन्तर्वर्तिनी व्यवस्था वर्तते। एवमेव विदेशेषु अपि जलयानद्वारा वायुयानद्वारा च पत्रादीना प्रेषणस्य समीचीना व्यवस्था वर्तते। डाकविभागस्य कर्मचारिणः यदि स्वस्वकार्येषु कामपि त्रुटि दुर्व्यवस्था दुर्व्यवहार च न कुर्युः[२०] तर्हि अस्मात् विभागात् महान् लाभः सम्पद्येत[२१]।

३५—पुस्तकालयः

यत्र सर्वेषा जनाना सामान्यरूपेण पठनाय पुस्तकाना सग्रहो विधीयते स पुस्तकालयः कथ्यते।

पुस्तकालयेषु प्रायेण बहूना जनाना सहायतया विविध-विषयकाणा पुस्तकाना सग्रहो विधीयते। तस्य सञ्चालनाय एका समिति भवति। एक पुस्तकालयाध्यक्षो निर्वाच्यते य प्रतिदिन सुनिश्चिते समये आगत्य पुस्तकालयस्य उद्घाटन करोति तथा पुस्तकाना आदानप्रदानयोः च व्यवस्था करोति। पुस्तकालये बहूनि समाचारपत्राणि अपि आगच्छन्ति। नियमिते समये पाठका. आगत्य यथारुचि पुस्तकानि पत्र-पत्रिकादीनि च आदाय पठन्ति, पठित्वा च गमनसमये परावर्तयन्ति[१]। ये जना पुस्त-कालयाय नियमितरूपेण मासिक शुल्क ददते ते स्वगृहेऽपि पुस्तकानि नीत्वा पठितु शक्नुवन्ति।

२०—करें। २१—हो। १—लौटाते है।

पुस्तकालयानां स्थापनेन प्रचारेण च समाजस्य महान् लाभो वर्तते। शिक्षा प्रचारस्य साधनेषु पुस्तकालयानां महत्वपूर्णं स्थानं वर्तते। येषां जनानां सविधे पुस्तकानां क्रयणाय धनं न भवति तेऽपि पुस्तकालयान् गत्वा इच्छानुसारं पुस्तकानि पठन्ति। ये च निर्धनाः छात्राः स्वद्रव्येण पाठ्य-पुस्तकानां क्रयणे असमर्थाः भवन्ति तेऽपि पुस्तकालयेभ्यः पुस्तकानि गृहीत्वा स्वकार्यं सञ्चालयन्ति। यस्मिन् स्थाने पुस्तकालयो भवति तत्र ये अनिच्छया गच्छन्ति तेऽपि किञ्चित् पठन्त्येव। अथ च ये विशिष्टा विद्वांसः कस्यापि विषयस्य विशेषरूपेण अध्ययनं अनुसन्धानं वा कुर्वन्ति तेषां निर्वाहस्तु पुस्तकालयेभ्यः विना असम्भव एव वर्तते। एवं च शिक्षाप्रचारे पुस्तकालयानां महती उपयोगिता वर्तते। पुस्तकालयेषु समाचारपत्रद्वारा यत् देश-विदेशयोः समाचाराणां ज्ञानं भवति सोऽपि एक महान् लाभः अस्ति।

प्रसन्नतायाः अयं विषयो वर्तते यत् सम्प्रति पुस्तकालयानां संख्या दिने दिने वर्धमाना विलोक्यते। राजकीयशिक्षा-विभागः, सामाजिका पुरुषाः साधारणजनाश्च सर्वेऽपि पुस्तकालयानां सम्यक्त्वार्थं प्रयतमाना सन्ति। पुस्तकालयानां संघटनाय च कार्यचन् समितयोऽपि सर्वत्रप्रदेशेषु राज्यद्वारा संचालिता सन्ति। इमा प्रगतिं दृष्ट्वा विश्वासो भवति यत् अल्पेनैव कालेन ग्रामे २ पुस्तकालयाः स्थापिताः भविष्यन्ति। क्वचित् क्वचित् पुस्तकालयेषु प्रबन्धाः दुर्व्यवस्था अपि दृष्टिगोचरा भवन्ति। यथा—क्वचित् उपयोगिनां पुस्तकानां न्यूनता भवति, क्वचित् आवश्यकानि उपकरणानि न भवन्ति, क्वचित् उद्घाटनस्य पिधानस्य च समयो निश्चितो न भवति, क्वचित् पुस्तकानां आदान प्रदानयोः क्वचित् शुद्धव्यवस्था न भवति। इमाः सर्वाः दुर्व्यवस्थाः यदि दूरीकृताः स्युः तदा पुस्तकालयेभ्यः समाजस्य सुमहान् उपकारः संभवते।

३६—शिक्षा

यया[1] मनुष्यस्य शारीरिकशक्तीनाम् आध्यात्मिकशक्तीनां च सम्यक् प्रकारेण विकासः भवति सा शिक्षा कथ्यते। मनुष्य केवल जन्मना एव मनुष्यो न भवति प्रत्युत[2] यदा स शिक्षा प्राप्नोति तदैव पूर्णरूपेण मनुष्यो भवति। अतः मनुष्याणां कृते शिक्षा सर्वाधिकम् आवश्यकं महत्त्वपूर्णं च वस्तु वर्तते।

शिक्षायाः अगणनीया लाभाः सन्ति। यावान् मनुष्यः समुचिता शिक्षा न लभते तावत् स किमपि कार्यं समीचीनरूपेण[3] कर्तुं न शक्नोति। यथा खनितः[4]—निर्गतं रत्नं संस्कारं विना धारणोपयोगि न भवति तथैव मनुष्यः अपि शिक्षां विना समाजे व्यवहारोपयोगी न भवति।

यदा मनुष्यः बाल्यकालाद् एव समुचितां शिक्षां प्राप्नोति तदा एव स सम्यक् प्रकारेण कर्तव्यम् अकर्तव्यं वा ज्ञातुं शक्नोति। स एव उचितम् अनुचितमपि वा वेदितुं[5] प्रभवति[6]। शिक्षासम्पन्नः पुरुषः यदेव कार्यं करोति तदेव समीचीनतया[7] करोति। शिक्षितानां पुरुषाणां भोजनं पानम्, हासः परिहासः, क्रीडा कौतुकम्, वादः विवादः, आलापः संलापः, आस्थानम्[8] उपवेशनम्[9], कासः[10] श्वासश्चेति सर्वमपि लघु महद् वा कार्यं शोभनं सभ्यतापूर्णं च भवति। इतो विपरीतम् अशिक्षितानां

१—जिससे। २—बल्कि। ३—अच्छी तरह से। ४—खान। ५—६—जान सकता है। ७—अच्छी तरह से। ८—उठना। ९—बैठना। १०—खाँसी।

जनाः यदेव कार्यं कुर्वन्ति तदेव असभ्यतापूर्णम् अशोभनम् उद्वेगजनकं च भवति। अतो मानवजीवने शिक्षायाः महत्त्वं सर्वाधिकं मन्यते।

हर्षस्य अयं विषयो वर्तते यत् सम्प्रति स्वतन्त्रे भारते शिक्षालयाना संख्या प्रतिवर्षं वर्द्धमाना विलोक्यते।

इयं शिक्षाया. अभिवृद्धिः देशस्य कृते शुभलक्षणं वर्तते। परन्तु सहैव[11] इदं दृष्ट्वा महद् दुःखमपि भवति यत् साम्प्रतं शिक्षालयेषु ये शिक्षा गृह्णन्ति तेषु संयमस्य, सदाचारस्य, अनुशासनपालनस्य च महान् अभावो दृश्यते। ते केवलं परीक्षादानं, प्रमाणपत्रस्य प्राप्तिं, ततश्च येनकेनापि प्रकारेण अर्थोपार्जनकरणमेव स्वजीवनस्य अन्तिमं लक्ष्यं मन्यन्ते। वर्तमानायां शिक्षापद्धतौ अयमेकः महान् दोषः अस्ति यतः शिक्षाप्रचारेण सह अस्य महतो दोषस्य दूरीकरणेऽपि ध्यानदानं परमावश्यकं वर्तते तदैव शिक्षा वास्तविकी शिक्षा भविष्यति, शिक्षिताश्च वास्तविकरूपेण शिक्षिता मंस्यन्ते[12]।

२७-विद्या

येन वस्तुना मनुष्यस्य अज्ञानं नश्यति तथा ज्ञानं जायते[1] त विद्या इति कथ्यते।

अस्मिन् संसारे बहूनि उपयोगीनि वस्तूनि सन्ति परं तेषु विद्या एव सर्वश्रेष्ठं उपयोगि वस्तु अस्ति। अखिलेऽपि ब्रह्माण्डे ईदृशं किमपि वस्तु नास्ति यत् विद्याया समानता कुर्यात्[1]।

संसारे धनस्य महती प्रतिष्ठा वर्तते। धन विना मनुष्यस्य

११—साथ ही। १२—माने जायेंगे। १—करे।

निवाहः सर्वथा असंभवः अस्ति। परन्तु धनम् अपि विद्यायाः समानता कर्तुं न शक्नोति। यतः धनं खलु चौरा. चोरयन्ति, लुण्ठकाः[1] लुण्ठन्ति, अग्नि. ज्वालयति, जलं वाहयति, दायादा.[2] विभजन्ते[3], शासकाः हरन्ति, तथा पशवः पक्षिण. कीटका च भक्षयन्ति। बहूनि धनानि भूकम्पादिना विनश्यन्ति स्वयं वा कालवशात् जीर्णशीर्णानि भूत्वा अन्ते विनाशं प्राप्नुवन्ति। एवं प्रकारेण धनिकाना धनसम्बन्धे पदे पदे भीतय.[4] सन्ति। परन्तु विद्याधने एतादृश किमपि भयं नास्ति। अन्यानि धनानि व्यये[5] क्रियमाणे क्रमशः क्षीणानि भवन्ति परं विद्याया भण्डारः यथा यथा व्ययीक्रियते[6] तथा तथा प्रतिदिनं परिवर्द्धते एव।

विद्यासमानं भूषणम् अपि संसारे अन्यत् नास्ति। सामान्यतः लोके सुवर्णमयानि[7] रजतमयानि च[8] भूषणानि शोभायाः साधनानि मन्यन्ते। अतएव नराः नार्यश्च किरीटेन[9] कुण्डलेन, कंकणेन केयूरेण[10], नूपुरेण[11] मंजीरेण[12], तिलकेन चन्दनेन तथा अन्यैश्च आभूषणैः निज-निज शरीराणि भूषयन्ति। बहव: जनाः शोभाय कण्ठे हारं धारयन्ति, मुखे ताम्बूलं चर्वयन्ति, नयनयोः कज्जलं लगायन्ति, मणिबन्धे[14], घटीं[15] बध्नन्ति, विविधा. केशरचनाः कुर्वन्ति तथा सुन्दर-सुन्दराणि वस्त्राणि च परिदधते[16]। परन्तु मनुष्यस्य शोभा यथा विद्यया भवति तथा अन्यसाधनैः न भवति। विद्याभूषणस्य अग्रे अन्यानि भूषणानि निष्प्रभाणि भवन्ति। अतएव महाकविना भर्तृहरिणा लिखितम्—

२—लुटेरे। ३—पट्टीदार। ४—बाँट लेते हैं। ५—भय। ६—खर्च। ७—खर्च किया जाता है। ८—सोने के। ९—चाँदी के। १०—मुकुट। ११—बिजायठ। १२—पायजेब। १३—नूपुर का ही भेद। १४—कलाई पर। १५—घड़ी। १६—पहनते हैं।

विद्या पर भूषणम् ।

विद्याया गुणा लाभाश्च अगणनीया सन्ति । विद्यया एव मनुष्य विद्वान भवति, हिताहित जानीते, उचितानुचित विचारयति, कर्तव्याकर्तव्ययोश्च निश्चय करोति । विनय, नियम, शील, सहृदयता, सदाचार, शिष्टता चेति गुणगणा अपि विद्याप्रभावेण एव मनुष्ये समागच्छन्ति । अनेन कारणेन विद्यावाण् जन यत्रैव गच्छति तत्रैव आदर लभते तथा पूजित* प्रतिष्ठितश्च भवति ।

अन्यच्च, अद्य जगतीतले यत्किञ्चित् मय शिव, सुन्दर तथा विस्मयकर विविध वस्तुजात पश्याम तत् सर्वं विद्याया एव फलं वर्तते । विद्याबलेन एव मनुष्यै नानाविधा आविष्काराः आवष्कृता सन्ति ।

यदि जगतीतले विद्याया प्रकाशो न स्यात् तदा सममपि विश्व अज्ञानान्धकारे निमग्न जायत तथा मानवजीवन पशुजीवन-समान सम्पद्येत । सफलतायै तथा संपूर्णजगति सुखशान्ति समृद्धये च विद्याया प्रसारस्य महती आवश्यकता वर्तते ।

३८-अस्माक राष्ट्रभाषा

या भाषा राष्ट्रे सर्वाधिक प्रचलिता भवति तथा यस्या भाषाया राष्ट्रस्य सर्वाणि राजकार्याणि भवन्ति सा राष्ट्रभाषा कथ्यते । एकतायै तथा व्यवहारे सुविधाये एकस्या. राष्ट्रभाषाया भवनम् परमावश्यक भवति ।

---

*—होना ।

परतन्त्रतायाः समये अस्माकं देशस्य सर्वाणि राजकार्याणि अंग्रेजीभाषायां भवन्ति स्म। अंग्रेजीभाषा एव तदा राजमान्या भाषा आसीत्। शिक्षायां समाजे शासने च तस्याः एव सर्वत्र प्रधानता आसीत्। परन्तु यस्मात् कालात् अस्माकं देशः स्वतन्त्रतां प्राप्तवान् अस्ति तस्मात् समयात् अंग्रेजीभाषायाः स्थाने हिन्दी एव राष्ट्रभाषा घोषिता वर्तते। अतः सम्प्रति अस्माकं देशस्य राष्ट्रभाषा हिन्दी एव वर्तते।

अस्माकं देशे अनेकाः प्रादेशिक्यः भाषाः प्रचलन्ति। उत्तर-भारते बँगला, मराठी, गुजराती, उड़िया, आसामी, मैथिली, पंजाबी प्रभृतयः अनेकाः भाषाः प्रचलिताः सन्ति। दक्षिणभारते च तमिल, तेलगू, कन्नड, मलयालम प्रभृतयः अनेका. भाषाः प्रचलिताः सन्ति। आसु सर्वासु अपि भाषासु हिन्दी सर्वाधिकं प्रचलिता भाषा वर्तते। देशस्य अधिकाः जनाः हिन्दीभाषाम् एव वदन्ति तथा अवगच्छन्ति[२] च। येषां मातृभाषा हिन्दी नास्ति ते अपि हिन्दीभाषाया माध्यमेन साधारणतया स्व-कार्य-सञ्चालने समर्थाः भवन्ति। अतएव हिन्दीभाषा राष्ट्रभाषापदे संस्थापिता वर्तते।

अस्माकं देशे एका अन्या भाषा संस्कृतम् अपि अस्ति। इयमेव भाषा अस्य देशस्य प्राचीना राष्ट्रभाषा अस्ति। हिन्दीप्रभृतयः सर्वाः अपि भाषाः अस्याः एव भाषायाः सन्ततयः[१] सन्ति। संस्कृतभाषा अद्यापि इमाः स्वसन्ततीः समानभावेन पालयति पोषयति च। अत एव संस्कृतभाषां प्रति सर्वेषां भारतीयानां हृदये महान् आदर-भावः अस्ति। अनेन कारणेन बहूनां संस्कृतानुरागिणां विचारः आसीत् यत् संस्कृत-

---

२-समझते हैं। १-सन्तान।

भाषा एव राष्ट्रभाषापदे समासीना भवेत्। परन्तु हिन्दीभाषा सम्प्रति लोकभाषा अस्ति। संस्कृतापेक्षया हिन्दीभाषायाः प्रचारः सुगमतया भवितुमर्हति। अतः हिन्दीभाषा एव बहूनां सम्मत्या राष्ट्रभाषा सिंहासने अभिषिक्ता वर्तते। संस्कृतभाषा च अस्याः आकर[४] भाषा येन सम्मानिता वर्तते। अर्थात् हिन्दीभाषायां यदि नूतनशब्दानां निर्माणस्य आवश्यकता भविष्यति तर्हि ते शब्दाः संस्कृतभाषायाः एव साहाय्येन निर्मास्यन्ते[५]। इदमपि स्वीकृतं वर्तते यत् हिन्दीभाषायाः राष्ट्रभाषाभवनेन प्रादेशिकभाषाणां समुन्नतौ काचन बाधा न भविष्यति। एव प्रकारेण स्वमातर संस्कृतभाषा सम्मानयन्ती तथा स्वभगिनी.[६] प्रादेशिकभाषाश्च स्नेहात् सवर्द्धयन्ती हिन्दीभाषा राष्ट्रभाषापदे सुशोभिता वर्तते।

यद्यपि राष्ट्रभाषा हिन्दी घोषिता वर्तते तथापि अस्याः समुन्नतौ व्यवहारे च प्रशासनस्य तथा जनतायाश्च यादृशी तत्परता अपेक्ष्यते तादृशी नास्ति। विद्वांसोऽपि अस्मात् दोषात् मुक्ता. न सन्ति। बहूना विदुषा हृदये अद्यापि अंग्रेजीभाषायाः मोहः विराजमानो वर्तते। दक्षिणभारतीया केचन शिक्षाशास्त्रिणः प्रत्यक्षरूपेण हिन्दीभाषाया विरोध कुर्वाणा. सन्ति। अन्ये बहवः उदासीना सन्ति। परन्तु अस्माकं कृते इद शोभनीय नास्ति। प्रशासनेन विद्वत्समाजेन नागरिकैश्च तथा प्रयतनीय यथा अल्पेन एव कालेन हिन्दीभाषा सर्वाङ्ग-सम्पन्ना भूत्वा वास्तविकरूपेण राष्ट्रभाषापद विभूषित कुर्यात्।

४—खजाना। ५—बनाये जायगे। ६—अपनी बहन। ७—सरकार का।

३१-पुस्तकानां रक्षा

ज्ञानस्य यानि अनेकानि साधनानि सन्ति तेषु पुस्तकं एकं प्रधानं साधनं वर्तते। विद्वांसः स्वेन अनुभवेन यत् ज्ञानं प्राप्नुवन्ति तत् पुस्तकेषु एव सुरक्षितं तिष्ठति। सृष्टिकालात् आरभ्य अद्यावधि संसारे यावन्तः ज्ञानस्य विषयाः सन्ति ते सर्वे पुस्तकेषु एव सुरक्षिताः सन्ति।

यदि संसारे लेखनस्य प्रणाली आविष्कृता न अभविष्यत्[1], यदि लेखकाः पुस्तकानि न अलेखिष्यन्[2], यदि लिखितानि पुस्तकानि सुरक्षितानि न अरक्षिष्यन्त[3] तर्हि ज्ञानस्य प्राप्तिः सर्वथा दुर्लभा अभविष्यत्।

यदि रामायणस्य पुस्तकं न अभविष्यत् तर्हि कथं रामकथाया अद्य ज्ञानम् अभविष्यत्? यदि वेदपुस्तकानि सुलभानि न अभविष्यन् तर्हि केन प्रकारेण ऋषीणां ज्ञान-विज्ञान-वैभवं लब्धम् अभविष्यत्? अत एव ज्ञानार्जनविषये पुस्तकानां महती उपयोगिता वर्तते।

प्राचीनकाले जनानां स्मृतिशक्तिः धारणशक्तिश्च प्रबला भवति स्म। अतः तस्मिन् काले श्रवणपरम्परया अपि ज्ञानं सुलभं भवति स्म। परन्तु अधुना उपर्युक्ते उभे[4] अपि शक्ती शनैः शनैः ह्रासं गते स्तः। अतः साम्प्रतं तु पुस्तकानि विशेष-रूपेण हितकराणि सन्ति।

अत एव पुस्तकानां रक्षायाः विषये पाठकानां ध्यानदानं

१—होता। २—लिखते। ३—रखी जातीं। ४—दोनों।

परमावश्यक वर्तते। बहव' जना पुस्तकानि पठन्ति परन्तु ते तानि सम्यक् न रक्षन्ति। केचन पुस्तकानि मोटयन्ति[५]। केचन पुस्तकानि त्रोटयन्ति[६]। केचन तानि भूमौ पोथयन्ति[७]। केचन पुस्तकेषु एव शिरो निधाय[८] शेरते[९]। केचन पुस्तकेषु एव खाद्य-वस्तूनि खादन्ति। केचन पुस्तकेषु एव लक्षणं मरिच च स्थापयन्ति[१०]। केचन पुस्तकेषु अनावश्यक लिखन्ति। केचक च सुन्दरादपि सुन्दर पुस्तकम् एकेन एव दिनेन मलिनयन्ति। न केवलम् एतावदेव। अनेके जना पुस्तकेभ्य पत्राणि तथा चित्राणि च विदारयन्ति[११]।

इमे सर्वे पुस्तके सह नियमाण[१२] दुर्व्यवहारा सन्ति। न च इमे सर्वे व्यवहारा स्वपुस्तकै सह एव विधीयन्ते प्रत्युत परेषा पुस्तके सह अपि। परन्तु इद सर्वथा अनुचित वर्तते। यथा पुस्तकेभ्य अस्माकं महान लाभ अस्ति तथैव तेषा सुरक्षायाम् अपि महती सावधानता वर्तनीया।

४०-व्यायामः

शारीरिक-शक्ति-वृद्धये य विविध श्रम[१] क्रियते स व्यायाम इति निगद्यते।

५—मोडते है। ६—तोड़ते है। ७—पटक देते है। ८—रखकर। ९—सोते है। १०—रखते है। ११—फाड़ देते है। १२—किये जाने वाले। १—मिहनत।

अस्माकं जीवने शारीरिकशक्तेः अपि महती आवश्यकता भवति। यथा जीवनस्य सफलतायै विद्याबलं वा, धनबलं वा, जनबलं वा आवश्यकं भवति तथैव शारीरिकं बलमपि आवश्यकं भवति। यस्य शरीरे बलं नास्ति, यस्य अङ्गप्रत्यङ्गानि हृष्टपुष्टानि न भवन्ति स साधारणमपि कार्यं कर्तुं न शक्नोति। अतः मनुष्यस्य कृते शारीरिक-शक्तिसञ्चयः अपि एकं परमावश्यकं कार्यं भवति। अस्याः शारीरिकशक्तेः साधनेषु व्यायामः एकं प्रमुखं[२] साधनं वर्तते।

व्यायामस्य अनेके प्रकाराः सन्ति। यथा-नियमेन प्रतिदिनं धावनम्[३], सायं प्रातः नियमितं भ्रमणम्, दण्ड-मुद्गरादीनां चालनम्, उत्थानम्, उपवेशनम्, प्राणायाम-करणम्, जले सन्तरणम्[४], निधिध्यासनम् आसनानाम् अभ्यासः, सूर्य-नमस्कारः, खेलन-कूर्दनादिकञ्च। एतद्व्यतिरिक्तं[५] अन्येऽपि अनेके व्यायामस्य प्रकाराः व्यायामशालासु[६] प्रचलिताः सन्ति।

एतेषां नियमपूर्वकम् अनुष्ठानेन अनेके लाभाः भवन्ति। शक्तिसञ्चयो भवति, अङ्ग-प्रत्यङ्गानि हृष्ट-पुष्टानि भवन्ति, शरीरं सुघटितं[७] जायते, श्रमशक्तिः वर्द्धते, स्वास्थ्यं शोभनं तिष्ठति, आलस्यं नश्यति, शिथिलता अपयाति[९] स्फूर्तिः सञ्जायते, रोगः अपि झटिति तस्योपरि आक्रमणं न करोति, जरा[१०] शीघ्रतया शरीरं न अभिभवति[११] तथा पाचनक्रिया अपि प्रायेण दूषिता[१२] न भवति। इमे बहुविधाः लाभाः सन्ति व्यायामकरणस्य।

व्यायामे न कश्चिद् व्ययो[१३] वर्तते न च बाह्य-साधनानाम्

२-प्रधान। ३-दौड़ना। ४-मुंगडा। ५-तैरना। ६-इसके अलावा। ७-अखाड़ो में। ८-गठीला। ९-दूर होती है। १०-बुढ़ापा। ११-दबाती है। १२-खराब। १३-खर्च।

एव आवश्यकता भवति। यदि शरीरं नीरोगं स्यात् तदा सर्वं जनाः सर्वत्र यत् किञ्चिद् व्यायाम कर्तुं शक्नुवन्ति एव। अतः सर्वैरपि जनैः यथासम्भव व्यायामद्वारा शारीरिकशक्ति सवर्द्धनाय प्रयास.[१४] कर्त्तव्य ।

४१—स्वास्थ्यम्

शरीरस्य चित्तस्य च निर्विकारा स्थिति एव स्वास्थ्यम् इति कथ्यते यदा मनुष्यस्य शरीरे मनसि वा कश्चिद् विकार न भवति तदा मनुष्य. स्वस्थ. इति उच्यते।

मनुष्यस्य जीवने बहूनि वस्तूनि आवश्यकानि भवन्ति। शिक्षा आवश्यकी भवति। धनम् आवश्यक भवति। गृहम् आवश्यक भवति तथा परिवार आवश्यक भवति। परन्तु एषु सर्वेषु अपि वस्तुषु सर्वापेक्षया आवश्यक वस्तु स्वास्थ्य भवति। मनुष्यस्य इद सर्वोत्तम धन वर्तते। यावत् मनुष्यस्य स्वास्थ्य शोभन न भवति तावत् स किमपि अन्यत् कार्य कर्तुं समर्थं न भवति। विद्याध्ययन वा, धनोपार्जन वा, धर्मानुष्ठान वा, लोकसेवा वा, परदेशगमन वा सर्वमपि कार्यं स्वस्थः एव मनुष्यः कर्तुं शक्नोति। अतएव महाकविना कालिदासेन कुमारसम्भवे कथितम्—

शरीरमाद्यं खलु धर्मसाधनम्।

ये मनुष्याः स्वस्थाः न भवन्ति ते स्वार्थं परार्थं वा किमपि कार्यं कर्तुं न पारयन्ति। तेषा कृते स्वकीयानि नित्यकर्माणि अपि

१४—प्रयत्न।

असाध्यानि भवन्ति। स्वास्थ्यहीनाना मनुष्याणा कृते[1] शरीर-धारणम् अपि कष्टकर भवति। अस्वस्थाः मनुष्याः गृहे सुख साधनेषु विद्यमानेषु[2] अपि सुखोपभोग कर्तुं न शक्नुवन्ति। तेषा कृते निखिलानि अपि सुखसाधनानि निरर्थकानि भवन्ति। अतः सुखोपभोगाय अपि स्वास्थ्यस्य महती आवश्यकता अस्ति।

अनेन कारणेन सर्वैः अपि सुखाभिलाषिभिः स्त्रीपुरुषैः स्वास्थ्यस्य उपरि पूर्णरूपेण ध्यान दातव्यम्। स्वास्थ्यरक्षाया: ये ये नियमा स्वास्थ्यपुस्तकेषु लिखिता सन्ति तेषा सम्यक् प्रकारेण पालन कर्तव्यम्। आहारे विहारे, शयने जागरणे च कालातिक्रमः न कर्तव्यः। स्वास्थ्यविरोधिना वस्तूना भोजने पाने वा उपभोगो न विधातव्य[3]। शरीरे, मनसि, मस्तिष्के[4] च अत्यधिको भारो न देय.[5]। प्रतिदिवस यथाशक्ति व्यायामः कर्तव्यः। स्थानस्य, शरीरस्य, वस्त्रादीना च स्वच्छताया ध्यानं दातव्यम्। एतेषा नियमाना पालनेन स्वास्थ्य समीचीन[6] तिष्ठति।

४२—समयस्य सदुपयोगः।

समयस्य समुचितेन रूपेण उपयोगः एव समस्य सदुपयोगः कथ्यते। समयस्य सदुपयोगः मानवसमाजस्य हितसाधकेषु साधनेषु सर्वप्रमुख साधन वर्तते।

ससारे बहूनि वस्तूनि बहुमूल्यानि सन्ति पर तेषु सर्वापेक्षया

१—लिये। २—रहने पर, रहते हुए। ३—करना चाहिए। ४—दिमाग पर। ५—देना चाहिए। ६—अच्छा।

बहुमूल्यं वस्तु समयः एव वर्तते। यतः अन्यानि वस्तूनि विनष्टानि अपि पुनः लब्धुं शक्यन्ते परन्तु व्यतीतः समयः केनापि उपायेन पुनः लब्धुं न शक्यते। विद्या विनष्टा पुनः अभ्यासेन लब्धुं शक्यते, धनं विनष्टं पुनः उपार्जनेन मिलितुं शक्नोति, यशो विनष्टं पुनः सत्कर्मणा उपार्जयितुं शक्यते परं विनष्टः समयः सहस्रैरपि प्रयत्नैः पुनः दुर्लभ एव।

अतएव समयः सर्वाधिकं बहुमूल्यं वस्तु मन्यते[1]। तस्मात् सर्वैः मनुष्यैः तथा प्रयत्नः कर्तव्यः यथा एकमपि क्षणं निरर्थकं न स्यात्। विश्रामसमयं परित्यज्य दिने वा रात्रौ वा सर्वदा स्वकर्तव्यपालनेन समयस्य सदुपयोगः कर्तव्यः। समयः स्वल्पः अस्ति, कर्तव्यानि बहूनि सन्ति। अस्यामपि अवस्थायां ये जनाः समयस्य सदुपयोगं न कुर्वन्ति ते बुद्धिमन्तः अपि मूर्खाः एव मन्तव्याः[2]। ये मनुष्याः एवंरूपस्य क्षणस्य बहु मूल्यं मन्यन्ते[3], एकमपि क्षणं वृथा न यापयन्ति[4], सर्वदैव कार्यकरणे निरताः तिष्ठन्ति ते एव बुद्धिमन्तः सन्ति। एतादृशाः एव जनाः आत्मनः समाजस्य देशस्य च समुन्नतिं कुर्वन्ति गौरवं च वर्द्धयन्ति[5]।

एभिः कारणैः समयस्य सदुपयोगकरणं कियत् परमावश्यकं कार्यं वर्तते इति विषये लेशमात्रस्यापि सन्देहस्य अवसरः नास्ति। तथापि दुःखस्य इयं वार्ता वर्तते यत् अस्माकं देशे बहवः जनाः समयस्य महान्तं दुरुपयोगं कुर्वन्ति। भूयांसः[6] जनाः वृथाशयनेन, वृथाभ्रमणेन, व्यर्थं कार्य-करणेन, निरर्थक-वार्तालापेन, इतस्ततो वृथा उपवेशनेन[7], वृथा कलहेन, व्यर्थेन

१—माना जाता है। २—माने जाने चाहिये। ३—मानते हैं। ४—बिताते हैं। ५—बढ़ाते हैं। ६—बहुत। ७—बैठने से।

विवादेन च स्वजीवनस्य अधिकतरं भागं वृथा[८] यापयन्ति। न ते स्वार्थमेव साधयन्ति न परार्थमेव। एतादृशाः जनाः स्वकीया दिनचर्यामपि यथासमयं न सम्पादयन्ति का पुनः वार्ता अन्यकार्याणाम्। ईदृशा जना न केवल स्वस्य एव हानिं कुर्वन्ति प्रत्युत सम्पूर्णस्यापि समाजस्य देशस्य च हानिं कुर्वन्ति।

अस्माकं भारतीयाना धृते अयं राष्ट्रनिर्माणस्य कालः वर्तते। अस्माकं स्कन्धेषु राष्ट्रनिर्माणस्य महान् भार वर्तते। अस्मिन् समये तु विशेषरूपेण अस्माभि समयस्य सदुपयोगे ध्यानं दातव्य यत शीघ्रतया राष्ट्रस्य समुन्नतिः स्यात्। अस्मिन् विषये छात्रै विशेषतया ध्यान देयम्। यत[९] ते एव भारतस्य भाविन कर्णधाराः तथा भाग्यविधातारः सन्ति।

४३—व्यवहार-ज्ञानम्।

अन्येन जनेन सह केन प्रकारेण व्यवहार कर्त्तव्य एतस्य ज्ञानं व्यवहार ज्ञानं कथ्यते।

मनुष्य एवः सामाजिकः प्राणी अस्ति। स एकाकी[१] वस्तुं न शक्नोति। स समाजे जन्म गृह्णाति, समाजे जीवति, समाजे निवसति तथा समाजे एव मृत्युमपि प्राप्नोति। अतएव जन्मना सहैव[२] तस्य अनेकैः पुरुषै सह सम्बन्धः भवति।

८—बेकार। ९—क्योंकि।

१—अकेला। २—साथ ही।

अन्यच्च, मनुष्याणां कृते[1] बहूनि कर्तव्यानि अपि आवश्यकानि भवन्ति। तेषु कानिचित् वैयक्तिकानि[2], कानिचित् पारिवारिकाणि, कानिचित् सामाजिकानि, कानिचित् राष्ट्रीयाणि तथा कानिचित् अन्यविधानि अपि भवन्ति। अनेन कारणेन अपि मनुष्यस्य अनेकैः मनुष्यैः सह सम्बन्धस्थापनस्य, अनेकैः मनुष्यैः सह निवासस्य, अनेकैः मनुष्यैः सह वार्तालापस्य तथा अनेकैः मनुष्यैः सह कार्यकरणस्य अनिवार्यः[3] आवश्यकता भवति। अस्या परिस्थितौ केन पुरुषेण सह कुत्र कीदृशः व्यवहारः कर्तव्यः इत्यस्य समुचितं ज्ञानं सर्वेषां मनुष्याणां कृते परमावश्यकं भवति। व्यवहारज्ञानम् एका जीवनोपयोगिनी महती कला अस्ति। अस्यां कलायां ये जनाः कुशलाः भवन्ति ते एव समाजे बुद्धिमन्तः गण्यन्ते[4], समाजस्य नेतृत्वं कुर्वन्ति, सर्वत्र आदरं लभन्ते तथा सर्वेषु कार्येषु सफलतां प्राप्नुवन्ति। इतो विपरीतं ये जनाः व्यवहारज्ञानेन शून्याः भवन्ति ते सकल-शास्त्र-निष्णाता अपि समाजे मूर्खा मन्यन्ते, सर्वत्र अनादरं लभन्ते तथा जीवने सर्वेषु अपि कार्येषु असफला एव भवन्ति। अतएव समाजे सम्मानाय कार्येषु सफलताप्राप्तये च सर्वैरपि जनैः व्यावहारिकज्ञानस्य अर्जनाय तदनुकूलम् आचरणाय च प्रयत्नः कर्तव्यः।

व्यवहारस्य क्षेत्रम् अतीव विस्तृतं वर्तते। अतएव तत्र सफलतायै ज्ञानमपि विस्तृतमेव अपेक्ष्यते। तथापि यत् यत् ज्ञानं व्यवहारक्षेत्रे नितान्तम् आवश्यकं भवति तस्य तस्य ज्ञानाय अवश्यं प्रयत्नः कर्तव्यः।

३—लिये। ४—व्यक्तिगत, निजी। ५—नहीं रोके जाने लायक।
६—गिने जाते हैं।

४४—स्वावलम्बनम्

अन्येषाम् अवलम्बनं विहाय[1] स्वशक्त्या निजकार्य-सम्पादनं स्वावलम्बनं कथ्यते। एतस्य एव द्वितीयः पर्यायवाची शब्दः आत्मनिर्भरता अस्ति।

आत्मनिर्भरता स्वावलम्बनं वा मनुष्यस्य एकः महान् गुणः अस्ति। स्वावलम्बनं मनुष्यस्य शारीरिकीणां मानसिकीनां च शक्तीनां विकासस्य सर्वोत्तमः उपायः अस्ति। स्वावलम्बिनां पुरुषाणां शरीरे स्फूर्तिः आयाति, चिन्तनशक्तिः वर्द्धते, बुद्धेः विकासः भवति, नव-नवाः अनुभवाः जायन्ते तथा आत्म-गौरवस्य च आनन्ददायिनी अनुभूतिः[2] भवति।

ये मनुष्याः स्वावलम्बिनः भवन्ति, आत्मनिर्भराः भवन्ति, पदे पदे अन्येषां मुखं न अवलोकयन्ति ते एव समाजे आदर्श-पुरुषाः मन्यन्ते। एतादृशा एव पुरुषाः साहसिकाः, सहिष्णवः, प्रत्युत्पन्नमतयः, प्रतिभासम्पन्नाः, कार्यकुशलाः, कर्तव्यपरायणाश्च भवन्ति। स्वावलम्बनस्य प्रभावेण निर्धनाः अपि धनवन्तः भवन्तिः, निरक्षराः अपि महापण्डिताः जायन्ते, अप्रतिष्ठिताः अपि महतीं प्रतिष्ठां लभन्ते, दुर्विनः अपि महत् सुखं प्राप्नुवन्ति तथा अकिञ्चनाः अपि महान्ति कार्याणि सम्पादयन्ति। एतादृशानां[3] स्वावलम्बिनां पुरुषरत्नानां न केवलं मनुष्यः प्रत्युत[4] ईश्वरोऽपि सहायतां करोति। ईदृशा एव जना जगति सुखं जीवन्ति, सर्वत्र समादरं लभन्ते, सर्वेषां च प्रीतिभाजनानि भवन्ति।

१—छोड़ कर। २—अनुभव। ३—बलिक।

इमे सर्वे स्वावलम्बनस्य लाभाः सन्ति। ये मनुष्याः अनेन गुणेन वञ्चिताः भवन्ति ते उपर्युक्तैः लाभैः अपि वञ्चिताः एव तिष्ठन्ति। दुरस्य अयं विषयो वर्तते यत् अस्माकं समाजे बहवः जनाः अनेन गुणेन रहिताः वर्तन्ते। ते एतस्य आवश्यकताम् अपि न अनुभवन्ति। ते स्वबुद्धया स्वशरीरेण च किमपि कार्यं कर्तुं न इच्छन्ति। ते सर्वदैव परावलम्बनं अतीदन्ते। अस्माकं देशे बहवः जनाः भाग्यवादिनः अपि सन्ति। ते भाग्यनिर्भराः भूत्वा पुरुषार्थं कर्तुं न समीहन्ते। परन्तु समाजस्य अयं महान् दोषः अस्ति। एतादृशा. परावलम्बिनः मनुष्याः न आत्मनः उन्नति कर्तुं पारयन्ति न समाजस्य वा। ईदृशाः यस्मिन् देशे निवसन्ति स देशः कदापि समुन्नतः भवितुं न शक्नोति अद्यावधि स एव देशः सा एव च जातिः संसारे समुन्नतिं कृतवती अस्ति यस्यां सर्वे अपि जनाः स्वावलम्बिनः परिश्रमशीलाश्च जाताः सन्ति।

अनेन कारणेन आत्मनः समाजस्य देशस्य च हिताय सर्वैः अपि मनुष्यैः पूर्णतया स्वावलम्बिभिः भवितव्यम्।

४५-अतिथिसत्कारः

स्वयं समागतानां समाहूतानां[1] वा मान्यजनानां समुचितः सत्कारः "अतिथिसत्कारः" आतिथ्यम् इति वा कथ्यते। सम्प्रति अतिथिसत्कारस्य कृते स्वागतशब्दस्य बाहुल्येन प्रचारः अस्ति।

१—बुलाये हुए।

अन्येषां सत्कारकरणं[2] खलु मनुष्याणां एकः महान् सामाजिकः गुणः अस्ति। विनयस्य, विवेकस्य, सामाजिकतायाश्च इदं प्रधान चिह्नं भवति। महत्त्वप्राप्तेश्च इदं प्रधानं सोपानमस्ति[3] यः पुरुषः अन्येषां सत्कारं करोति स सर्वेषां प्रीतिभाजनं भवति। सर्वे जनाः तं प्रशसन्ति, सर्वे सम्मानयन्ति, सर्वे स्नेहं कुर्वन्ति, सर्वे च तस्य कृतज्ञाः भवन्ति। यथा स अन्येषां सत्कारं करोति तथैव अन्येऽपि तस्य सत्कारं कुर्वन्ति।

धार्मिकदृष्ट्या अपि अतिथिसत्कारस्य महती महत्ता वर्तते। शास्त्रकारैः अतिथिसत्कारस्य पञ्चमहायज्ञेषु गणना कृता वर्तते। अस्माकं शास्त्रेषु गृहागतस्य[4] शत्रोः अपि सत्कार एव कर्तव्यकोटौ निहितः[5] अस्ति। का पुनः वार्ता अन्यपुरुषाणां सत्कारस्य। अतएव उपनिषदि लिखित वर्तते—"अतिथिदेवो भव" इति।

अस्य अतिथिसत्कारस्य अनेके विधयः सन्ति। यथा-दूरादेव आयान्तं श्रेष्ठपुरुषं दृष्ट्वा आसनात् उत्थानम्[6], तस्य समीपे गमनम्, विनयपूर्वकं प्रणामः, प्रीतिपुरस्सरं भाषणम्, कुशलप्रश्नः गृहे आनयनम्[7], समुचिते आसने उपवेशनम्[8], भोजनशयनादीनां सुव्यवस्था, व्यजनादिना[9] श्रमापनयम्[10], आवश्यकसेवायै पुनः पुनः पृच्छा[11], समीपे अवस्थानम्[12], स्वकार्यक्रमाणां परित्यागः सङ्कोचो वा, मधुराः अलापाः, आगमनाय प्रसन्नतायाः सूचनम्, अधिकनिवासाय आग्रहः, गमनकाले किञ्चिद्दूरं यावत्[13] अनुगमनम्[14], पुनः दर्शनदानाय अनुरोधः, तथा सस्नेहं विसर्जनं[15] च।

२—सत्कार करना। ३—सीढ़ी। ४—घर में आये हुए। ५—रखा गया। ६—उठाना। ७—ले जाना। ८—बैठना। ९—पंखा आदि से। १०—थकावट दूर करना। ११—पूछना। १२—ठहरना। १३—तक। १४—पीछे पीछे चलना। १५—विदा कर देना।

अयं सत्कारविधिः दूरात् समागतानां परपुरुषाणां च वर्तते। परं मातापितृप्रभृतय ये गुरुजनाः, ज्येष्ठकनिष्ठाः भ्रातरः, ग्रामवासिनो वा भद्रपुरुषाः सर्वदैव समीपे निवसन्ति तेषामपि यथोचितैः प्रणामाशीर्वादैः विनयपूर्वकेण व्यवहारेण, कुशलप्रश्नेन, आसनादिदानेन च सत्कारः विधातव्यः। एवमेव वयसा[15] कनिष्ठाना[16], भृत्यानां, क्षुद्रपुरुषाणां च प्रेमालापेन, कुशलप्रश्नेन, आसनप्रदानेन, भोजनपानादिना, सम्मानदर्शनेन च सत्कारः कर्तव्यो भवति।

समष्टिरूपेण अस्माकं देश अतिथिसत्कारे अतीव प्रसिद्ध अस्ति। तथापि व्यक्तिगतरूपेण बहवः जनाः अतिथीनां सत्कारकरणे नितराम् उदासीनाः भवन्ति। बहवस्तु कस्यापि आगमनस्य समाचारमपि श्रुत्वा दुःखिता भवन्ति। ते व्ययभयात् इतस्ततो निलीयन्ते[17] अन्यत्र वा गच्छन्ति। ईदृशा जना मुखेन मधुरं वचनमपि न वदन्ति। किं पुन वक्तव्य भोजनपानादि विषये? परन्तु ईदृशो व्यवहारः अस्माकं कृते धर्मविरुद्धः, संस्कृतिविरुद्धः परम्पराविरुद्धश्च अस्ति। अस्याः पवित्र-परम्परायाः पालनाय सर्वैरपि ध्याने दातव्यम्।

४६—संस्कृतप्रचारस्य आवश्यकता

संस्कृतभाषा अस्माकं देशस्य सर्वप्राचीना भाषा अस्ति। सम्प्रति अस्माकं देशे अनेका. भाषाः प्रचलिताः सन्ति।

१५—अवस्था से। १६—छोटों का। १७—छिप जाते हैं।

यथा-हिन्दी-बंगला, मराठी, गुजराती, उड़िया, आसामी प्रभृतयः। आभ्य. पूर्वं पाली-प्राकृताऽपभ्रंशप्रभृतयः भाषाः प्रचलिताः आसन्। आसां सर्वासामपि भाषाणां जननी संस्कृतभाषा एव अस्ति। संस्कृतभाषाया एव एतासां भाषाणाम् उत्पत्तिः अस्ति। अतएव इमाः भाषाः संस्कृतस्य पुत्र्यः पौत्र्यः वा निगद्यन्ते। अतएव अद्यापि संस्कृतभाषा जननी इव आसां भाषाणां पालनं पोषणं संवर्द्धनं च कुर्वन्ती अवलोक्यते।

अस्माकं भारतीयानां समस्तं साहित्यमपि संस्कृतभाषायामेव वर्तते। वेदा., उपवेदाः, वेदाङ्गानि, दर्शनशास्त्राणि, धर्मशास्त्रम्, अर्थशास्त्रम्, कामशास्त्रम्, पुराणानि, उपपुराणानि काव्यं नाटकञ्चेत्यादि समस्तमपि विशालं ज्ञान-विज्ञान-वैभवं संस्कृत-भाषायामेव निबद्धं वर्तते। ब्राह्मणसाहित्यातिरिक्तं जैनधर्मस्य बौद्धधर्मस्य च महत्त्वपूर्णाः ग्रन्था. संस्कृतभाषायामेव लिखिताः सन्ति।

: एवमेव अस्माकं सम्पूर्णः इतिहासः अपि अस्यामेव भाषायां समुपनिबद्धा वर्तते। देवासुराणाम् आख्यानम्, अवताराणां कथाः, महापुरुषाणां चरित्राणि, राजनीतिकाः वृत्तान्ताः, वंशोपवंशानां विस्तृतं वर्णनम्, भारतीयानां विदेशेषु गमनं, स्वसंस्कृतेः प्रचारश्चेति सर्वमपि भारतीयम् इतिवृत्तं संस्कृतस्यैव रामायण-महाभारत-पुराण-प्रभृतिषु ग्रन्थेषु समुल्लिखितं वर्तते। संस्कृतम् ऋते भारतीयेतिवृत्तपरिज्ञानाय न अन्यः कोऽपि पन्था विद्यते।

इत्थमेव भारतीयानां धर्म-संस्कृति-सभ्यता-सदाचारादि-विषयाणाम् अपि संस्कृतग्रन्थेभ्य एव ज्ञानं लब्धुं शक्यते। न अन्यतः।

एतेन इदं सिद्धं भवति यत् संस्कृतभाषायाः ज्ञानं विना भारतीयाना धर्मः, साहित्यम्, संस्कृतिः सभ्यता, इतिहासः, कला, ज्ञानं, विज्ञानं, रीति, नीतिर्वा किमपि यथार्थरूपेण ज्ञातु न शक्यते। अनेनैव कारणेन भारतीयजनतायाः कृते संस्कृत-शिक्षायाः महती आवश्यकता वर्तते। यस्य संस्कृतज्ञानं न भवति तस्य भारतीयतायाः किमपि ज्ञानं न भविष्यति। एतदतिरिक्तं भारतीयराष्ट्रस्य विभिन्नप्रदेशेषु सांस्कृतिकदृष्ट्या ऐक्यसंरक्षणाय अपि संस्कृतस्य महती उपयोगिता अस्ति इत्यपि ध्याने रखणीयं वर्तते।

अद्यापि संस्कृतभाषा भारतीयैः उपेक्षिता आसीत्। यद्यपि वयमस्माभिः संस्कृतभाषा वदन्ति स्म। परन्तु किम् इयं भाषा वस्तुतः उपेक्षणीया वा मृता वा यवनैः ? कदापि नहि। इयं दुर्बुद्धिभिस्तु केवलं दास्यवशात् अस्मासु समागता आसीत्। प्रसन्नतायाः अयं विषयो वर्तते यत् स्वतन्त्रताया प्राप्तायां दास्यरूपिणां दुष्टग्रहेण निर्मुक्ता सर्वेऽपि भारतीयाः सम्प्रति संस्कृतप्रचारस्य महत्त्वम् उपयोगितां च अङ्गीकुर्वन्ति। भारतस्य पूर्वं इदं गुणगानं वर्तते। यद् राष्ट्रं स्वकीयस्य साहित्यस्य, स्वकीयायाः संस्कृतेश्च संरक्षणं गौरवपदं न च मन्यते तद् राष्ट्रं कदापि समुन्नतिं वर्तुं न शक्नोति। इदं सर्वसम्मतं तथ्यं वर्तते आधारभूतं अनार्यं च। अतएव भारतराष्ट्रस्य कर्णधाराः तथा सर्वे भारतीया जनाश्च संस्कृतभाषायाः प्रचाराय प्रयत्नं करिष्यन्ति इति।

४७-नम्रता

विनयः नम्रता कथ्यते। नम्रता एकः मनुष्याणां महान् गुणः अस्ति। येभ्यो गुणेभ्यो मनुष्या महत्त्वं प्राप्नुवन्ति, सर्वत्र आदरं लभन्ते, सर्वेषां प्रीतिभोजनानि[1] च भवन्ति तेषु नम्रतायाः महत्त्वपूर्णं स्थानं वर्तते।

येषु पुरुषेषु अयं गुणो भवति तेषाम् उपरि ईश्वरस्य महती कृपा मन्तव्या। नम्रता हि मनुष्याणां भाविनो महत्त्वस्य परिचयं ददाति। ये पुरुषाः यावदेव[2] नम्रा भवन्ति तावदेव[3] समाजे ते महत्त्वं प्राप्नुवन्ति। विनम्रस्वभावानां पुरुषाणाम् उपरि सर्वे जनाः स्नेहं कुर्वन्ति। विनयवन्तो मनुष्याः यत्रैव गच्छन्ति तत्रैव स्वकीयेन विनयपूर्णेन व्यवहारेण सर्वान् वशीकुर्वन्ति। ते कठोरतरम् अपि हृदयं मृदुलतरं कुर्वन्ति, प्रतिकूलान् अपि जनान् अनुकूलान् विदधति, विपक्षिणोऽपि स्वपक्षे आनयन्ति तथा नीरसेऽपि हृदये रसधारा प्रवाहयन्ति।

नम्रतायाः विपरीतो यो दोषो वर्तते स उद्दण्डता इति कथ्यते। बहवः जनाः स्वभावत एव उद्दण्डाः भवन्ति। तेषु नम्रतायाः स्पर्शमात्रमपि न भवति। तेषां गमनम् आगमनम्, प्रश्नः उत्तरम्, हासः परिहासः, वार्ता विनोदः, सेवा सत्कारः, भोजनं पानं चेति सर्वमपि कार्यं उद्दण्डतापूर्णं विनयविहीनम् असभ्यतापूर्णं च भवति। एतादृशेषु जनेषु केऽपि जनाः स्नेहं न कुर्वन्ति। एतादृशाः उद्दण्डस्वभावाः जनाः यत्रैव गच्छन्ति

१—प्रेम-पात्र। २—जितना ही। ३—उतना ही।

तत्रैव अप्रिया भवन्ति। एते आत्मनः स्वभावदोषेण मित्राणि अपि शत्रुता नयन्ति, अनुकूलान् अपि प्रतिकूलान् कुर्वते, शान्तमपि जन क्षुपित कुर्वन्ति, सुसिद्धमपि कार्यं क्षणमात्रेण नाशयन्ति। उद्दण्डतया कृतापि ते सफला न भवन्ति। पदे पदे च विवदमाना कलहायमानाश्च नानाविधानि सङ्कटानि आपदश्च आवाहयन्ति[४]।

अयमेव नम्रतायाः उद्दण्डतायाश्च भेद अस्ति। अतो ये जना आत्मनो महत्त्व समीहन्ते, सर्वत्र सफलता कामयन्ते, समाजे समादरम् अभिलषन्ति, सर्वेषा च स्नेहभाजनानि भवितु वाञ्छन्ति तैः उद्दण्डताम् अशिष्टता[५] च परित्यज्य सर्वैः सह विनयपूर्णो व्यवहार. विधातव्यः[६]। बहवो जना आत्मनः विद्यामदेन वा, रूपमदेन वा, धनमदेन वा, कुलमदेन वा, पदमदेन वा मत्ताः सन्त माननीयैः अपि जनै सह सम्मानपूर्णं विनयपूर्णं च व्यवहारं न कुर्वन्ति। ते अन्यै सह विनयपूर्वक व्यवहारकरणं आत्मन प्रतिष्ठाया हानि मन्यन्ते। परन्तु ग्रयं विचार विवेकपूर्णं नास्ति। विनयेन एव मनुष्याणा प्रतिष्ठाया वृद्धिर्भवति न तु क्षयम्[७]। अतः यस्य यावती अधिका प्रतिष्ठा स्यात् तेन तावान्[८] एव विनयपूर्णः व्यवहारः कर्तव्य.।

नमन्ति फलिनो वृक्षा नमन्ति गुणिनो जना।

वर्तमानसमये बालेषु युवसु छात्रेषु च नम्रताया अभावा दृश्यते। ते गुरुजनै सह अपि अविनयपूर्णान् अशिष्टान् च व्यवहारान् कुर्वन्तो[९] विलोक्यन्ते[१०]। परन्तु ग्रय स्वभाव: तेषा कृते हितकर: नास्ति। अत सै. सर्वैरपि जनै विशेषतश्च

४—बुलाते है। ५—दुष्टता। ६—करना चाहिये। ७—घटता है।
८—उतनी। ९—करते हुए। १०—देखे जाते है।

युवकैः आत्मनः एव हिताय औद्धत्यम्[१२] अविनयम् अशिष्टतां च विहाय[१३] लघुभि सह, समानैः सह, गुरुजनैश्च सह यथा-सम्भवं विनम्रतया एव व्यवहारः कर्तव्यः ।

४८—सदाचारपालनम्

सत्[१] आचरणं सदाचार इति कथ्यते । गुरुजनानां सेवा, श्रेष्ठजनानां समादरः, सत्यवादिता, सरलता, निष्कपटः व्यवहारः सत्पुरुषाणां संगतिः, परधने परस्त्रीषु च अस्पृहा, इन्द्रियाणां निग्रहः, शीलं, सुजनता चेत्यादिगुणानां सदाचारे गणना भवति । एतेषां पालनं सदाचारपालनं निगद्यते ।

मनुष्यस्य उन्नति-साधकेषु गुणेषु सदाचारस्य सर्वोत्कृष्ट[२] स्थानं वर्तते । ये जनाः गुरुजनान् सेवन्ते, श्रेष्ठजनान् सत्कुर्वन्ति, माननीयान् मानयन्ति, मातुः पितुश्च आज्ञायाः पालनं कुर्वन्ति, सदा सत्यं वदन्ति, परेषां वञ्चना[३] न कुर्वन्ति, परधनं न समीहन्ते[४], परस्त्रियः न कामयन्ते[५] सत्पुरुषाणां संगतिं कुर्वन्ति, इन्द्रियाणि वशे रक्षन्ति तथा सङ्कटे अपि सन्मार्गं न परि-यजन्ति[६] तेषामेव जीवनं श्रेष्ठं वरिष्ठं सुखमयं शान्तिमयं च भवति । एतादृशानां सदाचारपरायणानां समाजे सर्वत्र समादरः भवति । ते यत्रैव गच्छन्ति तत्रैव सत्कारं पूजा प्रतिष्ठा

१२—उद्दण्डता को । १३—छोड़कर ।

१—सच्चा । २—सर्वोत्तम । ३—ठगई । ४-५—चाहते है । ६—छोड़ते है ।

सर्वोत्तमं च पदं प्राप्नुवन्ति। ईदृशाः पुरुषाः लोके परलोके वा, मित्रगृहे वा, स्वदेशे परदेशे वा सर्वत्र निर्भयाः निरापदश्च[७] विचरन्ति।

इतो विपरीतं ये जनाः सदाचारविरुद्धम् आचरन्ति, गुरुजनानां सेवां न कुर्वन्ति, श्रेष्ठजनानां समादरं न कुर्वन्ति, पित्रोः आज्ञायाः उल्लंघनं कुर्वन्ति, सदा असत्यं वदन्ति, परजनान् वञ्चयन्ति[८], परधने परस्त्रीषु च लोलुपा[९] भवन्ति, दुर्जनानां सङ्गति कुर्वन्ति, कुमार्गे चलन्ति, सन्मार्गं च परित्यजन्ति तेषां जीवनं सर्वथा गर्हितं[१०] अपमानितं सुखशान्ति-रहितं च भवति। ईदृशानां पुरुषाणां न लोके सद्गतिः भवति न परलोके। ते इतोऽपि भ्रष्टा भवन्ति ततोऽपि भ्रष्टा भवन्ति।

महतः दुःखस्य अयं विषयः वर्तते यत् सदाचारप्रधाने अस्माकं देशे सम्प्रति सदाचारपालनं प्रति महती शिथिलता[११] आगता वर्तते। सर्वत्र दुराचारस्य एव दृश्यं दृश्यते। चौर्यस्य लुण्ठनस्य, हिंसायाः, वञ्चनाया, व्यभिचारस्य, भ्रष्टाचारस्य च सर्वत्र साम्राज्यं वर्तते। समाजे सदाचार-संरक्षणार्थं दुराचारस्य निरोधार्थं[१२] च ये ये विभागाः प्रशासनेन[१३] नियन्त्रीकृताः सन्ति तत्रापि भ्रष्टाचारस्य न्यूनता[१४] नास्ति। इदमेव कारणं यतते यत् साम्प्रतिकः भारतीयसमाजः नितान्तं सङ्कटावस्थायां पतितः वर्तते। सुखं शान्तिर्वा समाजात् सर्वथा दूरं पलायिता[१५] अस्ति। अस्यां परिस्थितौ समाजे सदाचारस्य नियमाना पुनः प्रतिष्ठापनस्य महती आवश्यकता अस्ति। यावत् देशस्य जने

७—आपत्ति-रहित। ८—ठगते हैं। ९—लालची। १०—निन्दित। ११—ढिलाई। १२—रोकने के लिये। १३—सरकार द्वारा। १४—कमी। १५—भगी हुई।

जने सदाचारपालनं प्रति गरीयसी[16] निष्ठा न[17], भविष्यति तावत् देशस्य केनापि उपायेन वास्तविकी समुन्नतिः न भविष्यति। अतः प्रशासनस्य, सामाजिकपुरुषाणां जननायकानां च इदं सर्वापेक्षया प्रधानं कर्तव्यं वर्तते यत् पुनरपि समाजे सदाचार-प्रतिष्ठापनाय ते यथाशक्ति प्रयत्नं कुर्वन्तु तथा स्वयं च सदाचारान् पालयन्तु इति।

४१—स्वच्छता

मलिनतायाः[1] अभावः स्वच्छता इति कथ्यते। इयं च स्वच्छता द्विविधा भवति। एका बाह्य[2]-स्वच्छता द्वितीया आभ्यन्तर[3]-स्वच्छता च। स्थानस्य स्वच्छता शरीरस्य स्वच्छता, वस्त्रस्य स्वच्छता, कूप-तडागादीनां स्वच्छता तथा अन्येषां व्यावहारिक-वस्तूनां स्वच्छता बाह्यस्वच्छता कथ्यते। मनसि च रागद्वेषादीनां विकाराणाम् अभावः आभ्यन्तर-स्वच्छता कथ्यते।

जीवने स्वच्छतायाः अनेकदृष्टिभिः महती उपयोगिता वर्तते—महती आवश्यकता वर्तते सर्वप्रथमं स्वास्थ्यरक्षायाः एव कृते स्वच्छतायाः महती आवश्यकता भवति। येषां मनुष्याणां स्थानं शरीरं वस्त्रादिकं वा स्वच्छं न भवति तेषां स्वास्थ्यं कथमपि शोभनं न तिष्ठति। ईदृशाः जनाः प्रायेण स्वास्थ्यहीनाः रोगिणश्च तिष्ठन्ति। एतद्विपरीतं ये जनाः स्वच्छे गृहे निवसन्ति, स्वच्छं शरीरं रक्षन्ति स्वच्छानि वस्त्राणि धारयन्ति, स्वच्छेषु

१६—गुरुतर। १७—दृढ़ भक्ति, श्रद्धा।

१—गन्दगी का। २—बाहरी। ३—भीतरी।

पात्रेषु भोजनं कुर्वन्ति, स्वच्छं जलं पिबन्ति, स्वच्छानि खाद्य-वस्तूनि भुञ्जते[४] तथा सर्वाणि व्यवहारोपयोगीनि वस्तूनि स्वच्छानि सुपरिष्कृतानि च रक्षन्ति ते[५] प्रायेण सर्वदा नीरोगा प्रसन्नमानसाश्च तिष्ठन्ति।

सभ्याताः अपि दृष्ट्वा स्वच्छता नितान्तम् आवश्यकं वस्तु वर्तते। येषां निवासस्थानं स्वच्छं न भवति, येषां शरीरं स्वच्छं न भवति, ये स्वच्छवस्त्राणि न धारयन्ति, तेषां गणना सभ्यसमाजे न जायते। एतादृशानां जनानां समीपे न तु सभ्यजना गच्छन्ति न च ते एव सभ्यसमाजे गन्तुं साहसं कुर्वन्ति। एवम्भूताः[५] मलिनाः मलिन-वस्त्रधारिणश्च जनाः सभा-सम्मेलनेभ्यो भयभीताः इव दूरं एव तिष्ठन्ति। परं ये तु स्वच्छशरीराः स्वच्छवस्त्रधारिणश्च जना भवन्ति तेषां सर्वत्र अप्रतिहतः[६] प्रवेशो भवति। ते सर्वत्र सभ्यसमाजे सादरम् आहूयन्ते[७], सादरम् उपवेश्यन्ते[८] तथा सादरं सत्क्रियन्ते च।

एतस्याः बाह्यस्वच्छतायाः मानसिकप्रसन्नतायाः उपरि अपि महान् प्रभावो भवति। स्थानं, शरीरं, वस्त्रादिकं वा यदा स्वच्छं समुज्ज्वलं, सुपरिष्कृतं च भवति तदैव मनसि अपि प्रसन्नता भवति।

इमे सर्वे स्वच्छतायाः गुणाः सन्ति अस्वच्छतायाश्च दोषाः सन्ति। अतः ये नराः नार्यश्च स्वस्थाः भूत्वा जीवितुं समीहन्ते समाजे च समादरं लब्धुं कामयन्ते तैः पूर्णरूपेण बाह्यस्वच्छतायाः आभ्यन्तरस्वच्छतायाश्च उपरि पूर्णरूपेण ध्यानं दातव्यम्।

४—खाते है। ५—ऐसे। ६—बिना रोक टोक का। ७—बुलाये जाते है। ८—बैठाये जाते है।

५०—परिश्रमः

आलस्यं विहाय निरन्तरं कार्यपरायणता[1] परिश्रमः इति कथ्यते।

मानवजीवनस्य सफलतायै ये ये गुणाः आवश्यकाः भवन्ति तेषु परिश्रमस्य अतीव महत्त्वपूर्णं स्थानं वर्तते। ये मनुष्याः आलस्यं परित्यज्य दिवानिशं[2] परिश्रमं कुर्वन्ति ते एव स्वकीयं जीवनं सफलं कर्तुं शक्नुवन्ति। परिश्रमं विना कस्यापि कार्यस्य सिद्धिः न भवितुं शक्नोति। विद्या, यशः, धनं, कीर्तिः वा सर्वम् अपि परिश्रमेण एव लब्धुं शक्यते।

विद्यार्थिनः अपि यदा सम्यक् प्रकारेण परिश्रमं कुर्वन्ति तदैव ते प्रतिवर्षं परीक्षायां समुत्तीर्णाः भवन्ति, सुयोग्याः विद्वांसः भवन्ति, संसारे यशः सम्पत्तिं प्रतिष्ठां च उपार्जयन्ति तथा आत्मनः जीवनं सफलं कुर्वन्ति। किं बहुना, परिश्रमी मनुष्यः गृहे बहिः वा यत्रैव निवसति तत्रैव सुखपूर्वकं निवसति सम्मानस्य च भाजनं[3] भवति।

एतद्विपरीतं ये जनाः परिश्रमं न कुर्वन्ति; आलस्येन, शयनेन, यत्र तत्र वृथा भ्रमणेन, इतस्ततः उपवेशनेन[4], निद्रया, तन्द्रया च समयं यापयन्ति[5] तेषां जीवनं निरर्थकं एव भवति। एतादृशाः जनाः स्वजीवने किमपि लौकिकं पारलौकिकं वा कार्यं साधयितुं न शक्नुवन्ति। न ते विद्वांसः भवन्ति, न धनिकाः

१—काम में लगे रहना। २—दिन रात। ३—पात्र। ४—बैठ कर। ५—बिताते हैं।

भवन्ति, न यशस्विनः भवन्ति, न वा परोपकारिणः एव भवन्ति। एतादृशाः पुरुषार्थहीनाः परिश्रमहीनाः अलसा जना समाजस्य भारभूता भवन्ति। एते यत्र यत्र गच्छन्ति तत एव दूरीक्रियन्ते।

बहव जना पूर्वजे उपार्जितेन धनेन परिश्रमस्य आवश्यकता न अनुभवन्ति। परन्तु अय विचार उचित नास्ति। धने विद्यमाने अपि पुरुषैः परिश्रम कर्तव्य एव। वस्तुतस्तु य स्वय परिश्रम न करोति तत्र अन्यजनाना परिश्रमेण उपार्जितस्य धनस्य उपभोगे अधिकार एव नास्ति। अन्यच्च, सुखस्य वास्तविक स्वाद तत्र मिलति यदा मनुष्य. स्वय परिश्रम करोति।

परिश्रमकरणेन अन्ये अपि अनेके लाभाः भवन्ति। परिश्रमेण स्वास्थ्यरक्षा भवति, शरीर बलिष्ठ भवति, शरीरे स्फूर्ति. आयाति, आलस्य नश्यति, आत्मनिर्भरता आगच्छति तथा आत्मगौरवस्य च अनुभूति भवति। व्यक्ते°, समाजस्य, राष्ट्रस्य च समुन्नति, परिश्रमाधीना एव अस्ति। यस्मिन् देशे परिश्रमशीला जना निवसन्ति तस्य एव देशस्य समुन्नतिः भवति।

अतः मौ अपि मनुष्यै पूर्णोत्साहेण परिश्रमः कर्त्तव्य। सर्वविधाया समुन्नते प्रधान कारण परिश्रम एव वर्तते इति कदापि न विस्मर्तव्यम्।

५१—कर्तव्यपालनम्

यस्य मनुष्यस्य यत् कर्तव्यं वर्तते तस्य समुचितरूपेण पालनमेव कर्तव्यपालनं कथ्यते।

अयं संसारः कर्मभूमिः अस्ति, कर्तव्यभूमिः अस्ति। अस्मिन् संसारे यावन्तो[1] जनाः जन्म गृह्णन्ति तेषां सर्वेषामपि पृथक् पृथक् कर्तव्यानि भवन्ति। तानि कर्तव्यानि अनेकविधानि भवन्ति। कानिचित् व्यक्तिगतानि, कानिचित् पारिवारिकाणि कानिश्चित् सामाजिकानि। कानिचित् नित्यानि भवन्ति कानिचित् नैमित्तिकानि च। जीविकायै अपि कृषिर्वा, वाणिज्यं वा, कला वा, भृतिर्वा[2] इति बहुविधानि कर्माणि कर्तव्यानि भवन्ति। एवं च प्रत्येकं मनुष्यस्य उपरि अनेकविधानां कर्तव्यानां पालनस्य महान् भारो वर्तते। एकोऽपि एवम्विधो मनुष्यो न भविष्यति यस्य किमपि कर्तव्यं न स्यात्-यदि तस्य शरीरं बुद्धिर्वा व्यापन्ना[3] नास्ति।

एतेषां कर्तव्यानां पालनं मनुष्यस्य व्यक्तिगत-हिताय देश-हिताय च परमावश्यकं कार्यं भवति। ये मनुष्याः स्वकर्तव्यानां समुचितरूपेण पालनं कुर्वन्ति तेषामेव श्रेष्ठपुरुषेषु गणना भवति। ये सत्पुरुषाः परिश्रमपूर्वकं श्रद्धापूर्वकं च स्वकर्तव्यानि पालयन्ति ते न केवलं स्वस्यैव प्रत्युत[4] सम्पूर्णस्यापि समाजस्य देशस्य च हितसाधनं कुर्वन्ति।

यदि जनाः स्वकर्तव्यानां पालनं न कुर्युः[5] तर्हि समाजस्य

१—जितने। २—नौकरी। ३—बिगड़ी हुई। ४—बल्कि। ५—करें।

कापि व्यवस्था सफला भवितुं न अर्हति। कल्पना क्रियताम्- यदि अध्यापकाः सम्यक् न अध्यापयेयु, यदि विद्यार्थिनः परिश्रमेण न पठेयु, यदि न्यायाधीशाः समुचितरूपेण न्यायं न कुर्युः, यदि शासका. समीचीनतया शासनकार्यं न सम्पादयेयुः, यदि कर्मकराः[६] स्वानि स्वानि कर्माणि सम्यक्तया[७] न विदध्युः[८], यदि कृषका.[९] कृषिकार्ये श्रमेण न कुर्युः तर्हि किं देशस्य एकमपि कार्यं समीचीनरूपेण सम्पन्नं भवितुमर्हति ?

देशस्य कृते महतः सौभाग्यस्य अयं विषयो वर्तते यत् साम्प्रतिकेषु जनेषु कर्तव्यपालनं प्रति महती शिथिलता समागता वर्तते। केऽपि श्रमेण, सत्यतया, निष्ठया च कार्यं कर्तुं न वाञ्छन्ति[१०]। सर्वेऽपि वञ्चनया[११] एव स्वार्थसाधनं कर्तुं कामयन्ते[१२]। अधिकाराय तु सर्वे एव कलहं कुर्वन्ति परं कर्तव्यपालने कोऽपि ध्यानं न ददाति। इदमेव कारणं वर्तते यत् देशस्य राजकीया अराजकीया वा कापि उन्नतियोजना समुचितरूपेण फलवती न भवति। यावान्[१३] अर्थव्ययः समय-व्ययश्च भवति तावती[१४] कार्यसिद्धिः न भवति।

वस्तुतः अस्माकं देशस्य समाजस्य च इदं महद् दौर्भाग्यं वर्तते। यावत् सर्वे जनाः स्व स्व-कर्तव्यस्य पालनं निष्ठापूर्वकं न करिष्यन्ति तावत् न तेषां कल्याणं भविष्यति न देशस्यापि। कर्तव्यपालनमेव आत्मनः देशस्य वा समुन्नतेः मूलमन्त्रं अस्ति।

६—मजदूर। ७—अच्छी तरह से। ८—करें। ९—किसान। १०—चाहता है। ११—धोखा देकर ही। १२—चाहते है। १३—जितना। १४—उतनी।

५२—देश-सेवा

आत्मन. देशस्य तथा देशवासिनां सेवा देशसेवा इति कथ्यते।

कस्यापि देशस्य निवासिनां कृते स्वस्य देशस्य सेवा एकं परमावश्यक कर्तव्यं भवति। यस्मिन् देशे मनुष्यः जन्म गृह्णाति, यस्य देशस्य अन्नेन जलेन वायुना च जीवति, तथा यत्रत्यैः[1] साधनैः सुखोपभोगं करोति तस्य देशस्य सेवाकरणं मनुष्यस्य परमः धर्मः अस्ति।

यः मनुष्यः स्वस्य देशस्य सेवां न करोति, स्वस्य देशस्य कृते त्यागं न करोति, स्वस्य देशस्य सुख-दुखाभ्यां निश्चिन्तः तिष्ठति, स्वस्य देशस्य उन्नतये प्रयत्नं न करोति, तथा अवसरे स्वस्य देशस्य कृते प्राणान् अपि न परित्यजति तस्य मनुष्यस्य जीवनं निरर्थकम् एव मन्तव्यम्। स देशे वृथा जीवति तथा अरिलान् अपि देशवासिनः कलङ्कयति।

अस्मात् विपरीतं ये जनाः स्वस्य देशस्य सेवा कुर्वन्ति, स्वस्य देशस्य कृते त्यागं कुर्वन्ति, स्वस्य देशस्य सुखदुःखयो. चिन्तया चिन्तिता. तिष्ठन्ति, स्वस्य देशस्य उन्नतये प्रयत्नं विदधति[2] तथा अवसरे उपस्थिते सति देशसेवाया. बलिवेदिकायाम् आत्मार्पणं यावत्[3] कुर्वन्ति तेषाम् एव जीवनं सफलं भवति। एतादृशानि पुरुषरत्नानि कस्यापि देशस्य शिरोभूषणानि भवन्ति। अतः सर्वैः अपि देशवासिभिः यथासम्भवं स्वस्वदेशस्य सेवा अवश्यमेव कर्तव्या।

१—जहाँ के। २—करते हैं। ३—तक।

देशसेवायाः अनेके प्रकाराः सन्ति। यथा—देशहिताय सञ्चालितेषु आन्दोलनेषु सहयोगप्रदानम्, देशे वर्तमानाना दोषाणा निर्मूलनम्, युद्धकाले देशाय आत्मसमर्पणम्, स्वस्य-कर्तव्यानां समुचितरूपेण निष्ठापूर्वकं पालनम्, न्यायस्य रक्षा, उत्कृष्ट-साहित्यनिर्माणम्, शिल्पकलादीना सम्वर्द्धनम्, देशस्य स्वतन्त्रतायाः संरक्षणम्, देशवासिषु परस्पर सघटनस्य सहकारितायाः शिक्षायाः तथा सदाचारस्य प्रचारश्च। एभि. कार्यै. स्वशक्त्यनुसारं सर्वैः अपि मनुष्यै देशसेवा कर्तुं शक्यते।

यस्य देशस्य निवासिषु देशसेवाया उत्कृष्टा भावना भवति ते अल्पेन एव यत्नेन स्वकीय देश समुन्नतेः उन्नततम शिखरे आपयन्ति[४]। ससारस्य इतिहासे एतस्य अनेकानि उदाहरणानि मिलन्ति।

सम्प्रति एव कर्तव्यभार अस्माकं शिरसि आपतितः[५] वर्तते। अय समय भारतीयाना देशभक्तेः परीक्षायाः समयः अस्ति। अतः सर्वेषा भारतनिवासिना जनानाम् इद परम कर्तव्य वर्तते यत् ते अपि उपरि लिखितेन मार्गेण देशसेवा विधाय स्वदेशस्य, स्वदेशवासिना तथा आत्मनश्च हित सम्पादयेयुः[६]।

५३—एकता

मतभेदस्य विरोधस्य वा अभाव एव एकता इति उच्यते। एकताया अपर नाम "ऐक्य" "सङ्गठनं" वा इत्यपि वर्तते।

४—पहुँचा देते हैं। ५—आ पड़ा। ६—व्यवहार करें।

मनुष्याणां सांसारिक-जीवनस्य कृते एकता महान् लाभकारी गुणः अस्ति। यदि संसारे मनुष्येषु एकता न स्यात् तर्हि तेषाम् एकदिनस्यापि जीवनं कठिनं सम्पद्येत[1]। परिवारस्य एव उदाहरणं गृह्यताम्। परिवारस्य सर्वेषु अपि व्यक्तिषु यदि एकता न स्यात् तर्हि स परिवारः एकमपि दिनं सुखेन निवसितुं न शक्नोति। यस्मिन् परिवारे एकता न भवति, यस्य परिवारस्य सर्वे जनाः पदे पदे विवदन्ते[2], क्षणे क्षणे कलहायन्ते[3] तस्य परिवारस्य कीदृशी दुरवस्था भवति इति वयं प्रतिदिनं प्रत्यक्षीकुर्मः।

यथा परिवारे एकतायाः आवश्यकता वर्तते तथैव समाजे देशे तथा सम्पूर्णे संसारेऽपि।

एकतायां महती शक्तिः भवति। यत् कार्यम् एकेन न कर्तुं शक्यते तद् बहूनां सम्मिलितेन समुदायेन सुगमतया एव भवति। एकेन तृणेन किमपि कार्यं भवितुं न शक्नोति परं यदा तेषाम् एव तृणानां समुदायेन रज्जुः[4] निर्मीयते[5] तदा तया गजा अपि बध्यन्ते[6]। एकतायाः बलेन असाध्यमपि सुसाध्यम्, दुर्लभमपि सुलभं, कठिनमपि सरलं तथा दुष्करमपि सुकरं भवति। अत एव नीतिकारैः कथितम्—

संहतिः[7] कार्यसाधिका।

येषु एकता भवति ते एव सुखं जीवन्ति, तेषामेव समुन्नतिः भवति, ते एव विकासं प्राप्नुवन्ति, तेषामेव गृहे शान्तिः विराजते, तत्रैव सम्पदो निवसन्ति, तेभ्यः एव शत्रवो बिभ्यति[8], तान् एव जनाः मानयन्ति, ते एव समाजे प्रतिष्ठिता भवन्ति, तेषामेव

१—हो जाय। २—विवाद करते हैं। ३—झगड़ते रहते हैं। ४—रस्सी। ५—बनाई जाती है। ६—बाँधे जाते हैं। ७—संघटन, संघशक्ति। ८—डरते हैं।

कार्याणि सिद्धयन्ति, तेषामेव मनोरथाः पूर्य्यन्ते, तेषामेव वचः श्रूयते[९] तेषामेव च समाजे प्रभावो भवति। एतद्विपरीत येषु एकता न भवति तेषा सर्वमपि हृत[१०] विपरीतमेव भवति।

अत यथासम्भव सर्वेषु जन परिवारे समाजे देशे तथा विश्वस्मिन् भूमण्डलेऽपि एकताया स्थापनाय प्रयत्नो विधेय येन सम्पूर्णमपि विश्व सुखशान्तिमय स्नेहसौहार्दमय च सम्पद्येत।

वर्तमानसमये एकताया महान् अभाव. अस्ति। परिवारे समाजे देशे तथा सम्पूर्ण ससारे सर्वत्रैव अनेकतायाः, मतभेदस्य, अविश्वासस्य, वैरविद्वेषादीना, हिंसायाः प्रतिहिंसायाश्च महाभयङ्करो भूतभावात[११] प्रवहमानो दृश्यते। एतस्य प्रधान कारण तु स्वार्थपरता एव अस्ति। सर्वे स्वकीयमेव हित पश्यन्ति न अन्येषाम्। अस्या दशाया कथ नाम एकता सम्भवति[१२]। अत एकतायाः स्थापनाय परस्पर स्नेह सौहार्द-वर्द्धनाय च स्वार्थसाधनेन सहैव[१३] परेषामपि स्वार्थ रक्षणस्य उपरि ध्यानदानं परमावश्यक वर्तते।

५४—स्त्री-शिक्षा

मनुष्यसमाजः द्विधा विभक्तः अस्ति-स्त्रीसमाजे पुरुषसमाज च। स्त्रियः पुरुषाश्च उभये[१] अपि मिलित्वा समाजस्य निर्मा

९—सुना जाता है। १०—इसके। ११—भावी। १२—सकती है। १३—साथ ही। दोनों।

कुर्वन्ति तथा समाजस्य भारं वहन्ति। परन्तु समाजस्य कल्याणं तदा एव भवितुम् अर्हति यदा अयम् उभयविध अपि समाजः शिक्षितः भवति। अत एव समाजस्य हिताय यथा पुरुषसमाजे शिक्षाप्रसारस्य आवश्यकता अस्ति तथैव स्त्रीसमाजे अपि शिक्षाप्रसारस्य आवश्यकता अस्ति। यदा स्त्रिय पुरुषाश्च उभये अपि साक्षरा शिक्षिता सुयोग्याश्च भविष्यन्ति तदैव समाजस्य पूर्णरूपेण कल्याण भविष्यति।

वस्तुतस्तु पुरुषसमाजस्य अपेक्षया अपि स्त्रीसमाजस्य शिक्षा विशेषरूपेण आवश्यकी भवति। यतः[२] स्त्रिय एव बाल्यकाले बालाना लालन पालन च कुर्वन्ति। मनुष्याणा शैशव[३] मातृणाम् एव क्रोडे व्यतीत भवति। अस्याम् अवस्थाया यदि मातर शिक्षिता भवन्ति तदा ता शैशवाद् एव स्वशिशून् अपि शिक्षयन्ति। शिक्षिताः मातरः लालन पालनाभ्या सहैव स्वबालकान् सदाचार शिक्षयन्ति, सद्गुणान् उपदिशन्ति, दुर्गुणेभ्यो निवारयन्ति, सन्मार्गे प्रवर्तयन्ति तथा नानाविधा. शिक्षाप्रदाः कथा. कथयित्वा तेषा हृदयेषु उत्तमोत्तमाना गुणाना बीजानि वपन्ति[४]। एव प्रकारेण शिक्षितानां महिलाना बालका बालिकाश्च बाल्यकालात् एव शिष्टाः सभ्या सद्गुणसम्पन्नाश्च भवन्ति। एतादृशा एव बालका. भवे समाजस्य भूषणानि, नेतार गौरवबद्धकाश्च जायन्ते। अत सभ्यानां सुयोग्यानां नागरिकाणा निर्माणाय स्त्रीशिक्षायाः महती आवश्यकता वर्तते।

अस्माकं देशे स्त्रीसमाजस्य दशा अतीव शोचनीया वर्तते। स्त्रीसमाजे बाहुल्येन अनेके दोषाः सन्ति। अशिक्षा अस्ति,

---

२—क्योंकि। ३—बचपन। ४—गोदी में। ५—चलाती है। ६—बोते हैं।

अस्वास्थ्यम् अस्ति, अस्वच्छता अस्ति। कुसंस्काराः सन्ति, कुरीतयः सन्ति, कुरूढयश्च सन्ति। ईर्ष्या, द्वेष, असूया, असहिष्णुता, कलहप्रियता, मूढता, अन्धविश्वासः, गालिप्रदान-पटुता, दुराग्रहः, शपथकारिता चेति अनेके दोषा दुर्गुणाश्च वर्तन्ते। विशेषतश्च ग्रामीणासु महिलासु। इदं सर्वं च अशिक्षायाः एव फलं वर्तते। अत एतेषां दोषाणां दूरीकरणाय सभ्यमहिलासमाजस्य निर्माणाय च स्त्रीणां शिक्षणं सर्वाधिकं महत्त्वपूर्णं कार्यं वर्तते।

प्रसन्नतायाः अयं विषयः वर्तते यत् सम्प्रति शनैः शनैः स्त्रीशिक्षां प्रति समाजस्य रुचिः वर्द्धमाना[7] दिलोक्यते[8]। तथापि बहवः जनाः एतादृशा अपि सन्ति ये अद्यापि[9] स्त्रीशिक्षायाः उपेक्षां कुर्वन्ति। स्त्रीशिक्षायाः प्रचाराभावे अन्यानि अपि कारणानि सन्ति। अध्यापिकानां न्यूनता अस्ति। कन्या-पाठशालानां प्रचुरता नास्ति। सर्वेषां च समीपे बालानां धारि-ष्यणां च शिक्षायाः भारवहनस्य सामर्थ्यं नास्ति। एभिः कारणैः स्त्रीशिक्षायाः यादृशी प्रगतिः अपेक्ष्यते तादृशी न अस्ति। अतः शिक्षाधिकारिभिः समाजहितैषिभिश्च पुरुषैः एतस्मिन् विषये विशेषरूपेण ध्यानं देयम्। एतादृशीं च शिक्षापद्धतिः स्त्रीणां कृते निर्मातव्या[10] यथा स्त्रियः आदर्शपत्न्यः आदर्शमातरश्च भवेयुः। भारतीयसंस्कृतेः परिज्ञानाय तथा तदनुकूलाचरणाय च संस्कृत-भाषायाः अपि अध्ययनं स्त्रीणां कृते नितान्तम् आवश्यकं वर्तते इत्यपि न विस्मर्तव्यम्।

७—बढ़ती हुई। ८—दिखाई देती है। ९—आज भी। १०—बनानी चाहिये।

५५—पञ्चायत-व्यवस्था

सम्प्रति भारतीयप्रशासनेन[1] सम्पूर्णे अपि देशे पञ्चायत-व्यवस्था विहिता वर्तते। एतस्याः उद्देश्यम् अस्ति ग्रामाणां सुशासनं सुव्यवस्था तथा समुन्नतिः।

अस्माकं देशे ग्रामाणां एव संख्या अधिका वर्तते परन्तु तेषां दशा समीचीना[2] नास्ति। ग्रामेषु अशिक्षा वर्तते, अस्वास्थ्यं वर्तते। अत्याचाराः सन्ति, दुराचाराः सन्ति। दीनता अस्ति, दरिद्रता अस्ति। अकर्मण्यता अस्ति, आलस्यम् अस्ति। अनेके दोषाः सन्ति। यावत्[3] एतेषां दोषाणां निराकरणं न भवति तावत्[4] अस्माकं देशस्य उन्नतिः न भवितुम् अर्हति। *अतएव प्रशासनद्वारा पञ्चायतराज्यस्य व्यवस्था विहिता अस्ति।*

साधारणतया यत्र एकसहस्रसंख्याकाः जनाः निवसन्ति तत्र एका ग्रामसभा भवति। एकविंशतिवर्षेभ्यः अन्यूनवयस्काः[5] जनाः ग्रामसभायाः सदस्याः भवन्ति। ग्रामसभायाम् एका कार्यकारिणी समितिः भवति या "ग्रामपञ्चायत" इति कथ्यते। प्रत्येकं ग्रामपञ्चायते केचन जनाः निर्णायकाः[6] भवन्ति ये जन-संख्यानुसारं निर्वाचिताः भवन्ति। पञ्चायते हिन्दवः यवनाः[7] वा समानरूपेण सम्मिलिता भवन्ति।

तिस्रः पञ्च वा ग्रामसभाः मिलित्वा पञ्चायती-न्यायालयस्य

१—भारत सरकार द्वारा। २—अच्छी। ३—जब तक। ४—जब तक। ५—जिनकी कम-उम्र न हो। ६—पञ्च। ७—मुसलमान।

निर्माणं कुर्वन्ति। अत्रैव निर्णयके ग्रामीणविवादाना निर्णय क्रियते तथा दण्डव्यवस्था च विधायते।

ग्रामपञ्चायतानाम् अधिकारे बहूनि कर्तव्यानि सन्ति। शिक्षाप्रचाराय पाठशालाना पुस्तकालयाना च स्थापनम्, स्वास्थ्यरक्षायै चिकित्सालयाना प्रबन्ध, ग्रामीणानाम् उद्योग शिल्पाना समुन्नयनम्, गमनागमनमार्गाणा सुव्यवस्था, नवनयाना कूपतडागादीना निर्माणम्, जीर्णशीर्णाना च जीर्णोद्धार, कृषिवृद्धिकराणा साधनाना सग्रह, ग्रामरक्षाया कृते ग्रामसयथदलस्य निमाणम् तथा समये समये सास्कृतिक कार्यक्रमाणाम् आयोजन च। एतादृशानि बहूनि कार्याणि पञ्चायताना कृते कर्तव्यानि सन्ति।

इमानि कार्याणि यदि ग्रामपञ्चायतद्वारा सम्यक् प्रकारेण अनुष्ठितानि स्यु तर्हि ग्रामाणा वर्तमानदशाया महत् परिवर्तन भवितु शक्नोति। ग्रामाणा सर्वाङ्गीण-समुन्नति हृय सम्पूर्णा योजनाऽपि तदैव सफला भविष्यति यदा ग्रामपञ्चायताना सर्वेऽपि अधिकारिण कार्यकर्तारश्च सुयाग्या, श्रमशीला, कष्टसहिष्णव, जनहितैषिण, पक्षपातरहिता, न्यायप्रिया, सत्यवादिन तथा लोभरहिताश्च भविष्यन्ति।

५६-चल-चित्रपटम्

आधुनिकविज्ञानेन सम्प्रति बहूनि विस्मयकराणि वस्तूनि आविष्कृतानि सन्ति। तेषु एक महत्त्वपूर्णं वस्तु चलचित्रपट

अपि वर्तते। चलचित्रपटम् आङ्गलभाषाया सिनेमा (Cinema) इति कथ्यते।

चलचित्रपटे एव विस्तृत शुक्लवर्णं यन्त्र भवति। तस्मिन् एव यन्त्रे यन्त्रद्वारा चित्राणि प्रतिबिम्बितानि क्रियन्ते। तानि चित्राणि पूर्वं स्थिराणि भवन्ति। परन्तु यदा चित्रपटे प्रतिबिम्बि तानि निर्धीयन्त तदा यन्त्रसाहाय्येन तानि चलानि भवन्ति। अत एव एतस्य नाम चलचित्रपट इति वर्तते।

पूर्वं इमानि चित्राणि केवल चलानि एव आसन परन्तु सम्प्रति तानि शब्दोच्चारणम् अपि कुर्वन्ति। अत इदानीं इद सवाक् चलचित्रपटम् इत्यपि कथ्यत। साम्प्रतिकेषु चलचित्रपटेषु यानि चित्राणि प्रतिबिम्बितानि भवन्ति तानि हसन्ति, विलपन्ति, गायन्ति, नृत्यन्ति, चुम्बन्ति, आलिङ्गन्ति, वदन्ति, आलपन्ति, एव सर्वाणि शारीरिकाणि वाचिकानि च कर्माणि कुर्वन्ति। एवमेव पशव तथा पक्षिण अपि धावन्त उड्डीयमाना शब्दाय मानाश्च दृष्टिपथम् आयान्ति।

देशे विदेशे च सम्प्रति चलचित्रपटाना महान् प्रचार वर्तते। एकैकस्मिन् नगरे पञ्च २ सप्त ७ दश १० चलचित्रपटानि चलन्ति साधारणे नगरे अपि द्वित्राणि चलन्ति[1] दृश्यन्ते। प्रतिदिन अस्य प्रचार वर्द्धमान एव दृश्यते।

एतेषा चलचित्रपटाना प्रचारेण सम्प्रति समाजस्य महान् लाभो वर्तते। सर्वप्रथम तु मनोविनोदस्य इद सुमहत् साधनम् अस्ति। एतस्य सरस-मधुराणा गीताना श्रवणेन, मनोहराणा दृश्याणा दर्शनेन, चित्ताकर्षकाणा चित्राणाम् अवलोकनेन कौतूहलवर्द्धकाना कथोपकथनानाम् आकर्णनेन[2] च दर्शकाना महान् आनन्द जायते।

१—चलते हुए। २—सुनने से।

एतदतिरिक्त ज्ञानविस्तारे अपि एतस्य महती उपयोगिता वर्तते। कृषि, उद्योग., शिल्प, स्वास्थ्यम्, विज्ञानम्, चिकित्सा, पशुपालनम्, गृहव्यवस्था, शिक्षा चेति नानाविधाना उपयोगिना ज्ञातव्यविषयाणा तथा विभिन्नदेश-जातीना दर्शनीयवस्तूनाम् अपि व्यापके ज्ञाने चलचित्रपटानि बहु उपकारीणि भवन्ति।

समाजसुधारस्य अपि इदमेक महत् साधन वर्तते। समाजे परम्परागता अनेके दोषा वर्तन्ते। तेषा निवारणस्य महती आवश्यकता अस्ति। एतस्मिन विषये अपि चलचित्रपटेभ्यः महती सहायता मिलति समये२ एषु समाजसुधारसम्बन्धीनि अपि अनेकानि एतादृशानि दृश्यानि आगच्छन्ति येषा दर्शनेन दर्शकाना हृदये समाजसुधारस्य भावना जागर्ति।

इमे सर्वे चलचित्रपटै जायमानाः लाभाः सन्ति। परन्तु अनेन समाजस्य एका महती हानि अपि अस्ति। एषु चित्रपटेषु अनेकानि एतादृशानि अपि दृश्यानि आगच्छन्ति यानि सर्वथा अश्लीलानि, असभ्यतापूर्णानि, भारतीयसंस्कृति विरुद्धानि च भवन्ति। एषु दृश्येषु अर्धनग्ना नार्यः प्रदर्श्यन्ते३, अश्लीलानि गीतानि गीयन्त, अश्लीलप्रायाश्च चेष्टा विधीयन्ते। सर्वेषा समक्ष४ चुम्बनालिङ्गनादीनि कामोत्तेजकानि कार्याणि क्रियन्ते। एतादृशाना दृश्याना दर्शनेन दर्शकेषु, विशेषतश्च नवयुवतीषु, बालकेषु बालिकासु च कीदृशा भावा जागरिष्यन्ति इति सर्वे एव ज्ञातु शक्नुवन्ति। समाजे सम्प्रति सर्वत्र प्रतिदिन या चरित्रहीनता वर्द्धमाना दृश्यते तत्र इमानि चलचित्रपटानि अपि प्रधानकारणानि सन्ति।

अतः यावत् अस्य महतः दोषस्य निराकरण न भवति

३—दिखाई जाती है। ४—सामने।

तावत् चलचित्रपटेभ्यः लाभापेक्षया हानि. एव अधिका मन्यते[५]। चलचित्रपट खलु एकं एतादृशं तीक्ष्ण विष वर्तते यत् देशस्य भाविना नागरिकाणा मनासि बाल्यकालत एव दूषितानि करोति। अत. प्रशासनद्वारा सामाजिकसस्थाभिश्च अस्य शीघ्रातिशीघ्रम् निराकरणाय[६] प्रयत्नः कर्तव्य ।

५७-पुरस्कार-वितरणम्

प्राय सर्वेषु विद्यालयेषु वर्षस्य अन्ते एक वार्षिकोत्सवः भवति। तस्मिन् उत्सवे ये छात्राः पठने लेखने, वादे, विवादे, खेलने कूर्दने, स्वास्थ्ये सदाचारे च सर्वश्रेष्ठाः भवन्ति तेभ्य. विद्यालयद्वारा पुरस्कारा प्रदीयन्ते[१]। इदम् एव कार्यं पुरस्कार-वितरण पारितोषिकवितरण वा कथ्यते।

पुरस्काररूपेण नानाविधानि वस्तूनि दीयन्ते। साधारणेषु विद्यालयेषु प्रायेण पुस्तकानि, लेखन्य[२], मसीपात्राणि[३] च पुरस्कारे प्रदीयन्ते। महत्सु विद्यालयेषु पुस्तकाद्यतिरिक्तं रजतमयानि[४] सुवर्णमयानि[५] च पदकानि अपि वितीर्यन्ते[६]। क्वचित् क्वचित् रूप्यकाणाम् अपि पुरस्काररूपेण प्रदानं भवति।

वर्षान्ते यः वार्षिकोत्सव भवति तत्र एका सभा भवति।

५—मानी जायगी। ६—दूर करने के लिए।

१—दिये जाते हैं। २—कलम। ३—दावात। ४—चाँदी के।
५—सोने के। ६—दिये जाते हैं।

तस्यां सभायां यः सभापतिः भवति स एव पुरस्कारप्रदानं करोति। विद्यालयस्य कश्चित् कर्मचारी पुरस्कारप्रदानाय निर्वाचितानां[9] विद्यार्थिनां एकैकशः[10] नाम पठति। ततः सभापतिः तेभ्यः पुरस्कारान् प्रददाति। कर्मचारी यस्य छात्रस्य नाम गृह्णाति स छात्रः विनयपूर्वकं सभापतेः सम्मुखं[11] गच्छति, तस्मै सविनयं प्रणमति तथा पुरस्कारं च गृहीत्वा पुनः प्रसन्नमानसः स्वस्थानं गत्वा उपविशति। कचित् पुरस्कार-प्रदानानन्तरं तत्रत्याः सभासदः तालिकाः[12] अपि वादयन्ति[13]। अनन्तरं सभापतेः भाषणस्य पश्चात् सभा विसर्जिता भवति।

पुरस्कारप्रदानस्य प्रथा छात्राणाम् उत्साहवर्धनस्य दृष्ट्या अतीव लाभकारिणी अस्ति। बहवः छात्राः पुरस्कारप्राप्तेः आशया परिश्रमपूर्वकं पठन्ति तथा प्रथमश्रेण्याः लाभाय प्रयत्नं कुर्वन्ति। अनेके छात्राः वादविवाद प्रतियोगितायां खेलने कूर्दने वा पुरस्कारप्राप्तये एव कठोरं परिश्रमं कुर्वन्ति अहोरात्रं[14] च तन्मयाः भूत्वा तस्य अभ्यासं विदधति।

यदा छात्राः पुरस्कारं लभन्ते[15] तदा तेषां मनसि महती प्रसन्नता जायते, मुखमण्डलं प्रफुल्लितं भवति, तेषां गुरुजनाः सुहृदः, सहपाठिनः, बन्धुबान्धवाश्च अभिनन्दनं कुर्वन्ति। सर्वे च तत्रत्याः जनाः तं छात्रं समादरदृष्ट्या अवलोकयन्ति। एभिः कारणैः पुरस्कारप्रापकाणां[16] छात्राणाम् उत्साहः द्विगुणितः जायते। ते पुनरपि तथैव परिश्रमं कर्तुं प्रारभन्ते। तेषां सर्वत्र सम्मानं दृष्ट्वा अन्येषाम् अपि छात्राणां हृदये तथैव परिश्रमं कर्तुं प्रेरणा जायते।

७—चुने हुए। ८—एक-एक करके। ९—सामने। १०—तालियाँ। ११—बजाते हैं। १२—दिन-रात। १३—पाते हैं। १४—पाने वाले।

परन्तु क्वचित् क्वचित् पुरस्कारदातृभिः पुरस्कारप्रदाने अनुचितः पक्षपातः अपि विधीयते। तेन अयोग्याः ज्ञाना पुरस्कार लभन्ते योग्याश्च पुरस्कारप्राप्त्या वञ्चिताः भवन्ति। एतेन योग्यानां ज्ञानाणां उत्साहभङ्गो जायते मध्यस्थाश्च पक्षपात-दोषेण कलङ्किता भवन्ति। अतः पुरस्कारप्रदाने यथा पक्षपातः न स्यात् तथा मध्यस्थैः प्रयत्न कर्तव्य।

५८—वैज्ञानिका आविष्काराः

विश्वसाङ्मये अनेकानि शास्त्राणि सन्ति तेषु एक विज्ञान-शास्त्रमपि वर्तते। यस्य शास्त्रस्य मुख्य प्रयोजन सर्वेषामपि भौतिकपदार्थानाम् अध्ययनं, तत्त्वान्वेषण तथा तेषां लोकहित-कार्येषु नियोजन च वर्तते। सम्प्रति एतस्य शास्त्रस्य प्राचीन कालापेक्षया महती आश्चर्यमयी च समुन्नति जाता वर्तते।

अस्य शास्त्रस्य पारङ्गते पण्डिते ये ये अनेके नवीना वैज्ञानिका आविष्कारा आविष्कृता सन्ति ते एव वैज्ञानिका आविष्कारा उच्यन्ते। तेषु केचन मुख्यतमा इमे सन्ति—यथा वद्युत शक्ते[1] उपादनम्, तद्द्वारा नानाविधाना कार्याणा साधनम्, मुद्रणयन्त्राणि[2], सवाक् चित्रपटम्[3], ध्वनिप्रसारक यन्त्रम्[4], विविधानि विमानानि, सोइकिल मोटर रेलवे प्रभृतीनि नानाविधानि यानसाधनानि, अणुबम् प्रभृतीनि महान्ति युद्धसाधनानि तथा अनेकानि कृषिसाधनानि च।

१—बिजली का। २—छपाई के मशीन। ३—बोलता सिनेमा। ४—लाउड स्पीकर।

दिनानि एव पूर्वं भारतीय-प्रधानमन्त्रिणः श्रीनेहरूमहोदयस्य विश्वशान्तिस्थापनायै क्रियमाणस्य प्रयत्नस्य प्रशंसां कुर्वता आइन्स्टीनमहोदयेन कथितं यत् वैज्ञानिकानाम् आविष्काराणाम् शान्तिकार्येषु एव प्रयोगः कर्तव्यः न विध्वंसात्मकेषु कार्येषु। यदि सर्वेऽपि वैज्ञानिकाः आइन्स्टीन महोदय इव शान्तिस्थापनपक्षे स्वमतं दद्युः तर्हि वैज्ञानिकैः आविष्कारैः निःसंशयं महान् लाभः अविष्यति।

५९-ग्रामोन्नतिः

अस्माकं देशः ग्रामप्रधानदेशः अस्ति। अस्मिन् देशे नगराणाम् अपेक्षया ग्रामाणां संख्या अधिका वर्तते। देशस्य सर्वाधिका जनता ग्रामेषु एव निवसति। अतः इदं निश्चितं वर्तते यत् यावत् ग्रामाणां समुन्नतिः न भविष्यति तावत् भारतस्य उन्नतिर्न भवितुमर्हति। अतएव ग्रामोन्नतिविषये ध्यानदानस्य सम्प्रति महती आवश्यकता वर्तते।

दुःखस्य अयं विषयः वर्तते यत् अस्माकं ग्रामाणां वर्तमानदशा अतीव शोचनीया वर्तते। एतस्य इदम् एव प्रधानं कारणं वर्तते यत् उन्नतये यानि साधनानि आवश्यकानि भवन्ति तेषां साधनानां ग्रामेषु नितान्तम् अभावः अस्ति। शिक्षायाः कृते समीचीनः प्रबन्धः नास्ति। पुस्तकालयानाम् अभावः अस्ति। व्यायामशालायाः तु नाम अपि बहवः जनाः न जानन्ति। स्वच्छतायाः

उपरि ध्यानं नास्ति। औषधालयाः दूरे दूरे सन्ति। गृहशिल्पानां विकासस्य कृते काचन सुविधा नास्ति। मार्गाः त्रुटिताः स्फुटिताः विषमाः सङ्कीर्णाः च वर्तन्ते। नवाविष्कृतानां कृषिसाधनानां सुलभता नास्ति। तथा भूमिविषये सम्पत्तिविषये च महती विषमता वर्तते। इमानि एव कारणानि सन्ति येन ग्रामेषु अशिक्षायाः, कुसंस्काराणां, अस्वास्थ्यस्य, अस्वच्छतायाः, दरिद्रतायाः तथा दुःखस्य च सर्वतः साम्राज्यं वर्तते।

एतदतिरिक्तं गोवंशस्य ह्रासः, शिल्पिनां श्रमकर्मणि उदासीनता, ग्रामीणेषु सहकारितायाः अभावः, परस्परम् ईर्ष्या-द्वेषादीनां बहुलता, भाग्यवादस्य अवलम्बनम्, उत्साहसम्पन्नैः अभावः, सांस्कृतिकचेतनायाः शून्यता, विवाहादिषु संस्कारेषु अनावश्यकः व्ययः, मादकद्रव्याणां सेवनम्, अकर्मण्यता चेति दोषाः अपि ग्रामाणाम् अवनतेः प्रमुखानि कारणानि सन्ति। इमानि च कारणानि न केवलं ग्रामाणाम् एव प्रत्युत सम्पूर्णस्य अपि देशस्य समुन्नतौ महान्ति बाधकानि सन्ति।

अस्यां स्थितौ ग्रामोन्नतिविषये ध्यानदानस्य कियती आवश्यकता वर्तते इति विषये विशेषकथनस्य किमपि प्रयोजनं नास्ति।

यद्यपि ग्रामाणां समुन्नतये वर्तमानशासनं, सर्वोदयसमाज तथा अन्यानि राजनीतिकदलानि च महान्तं प्रयत्नं कुर्वाणानि दृश्यन्ते। ग्रामपञ्चायतेषु अपि ग्रामसुधारस्य प्रशासनेन महान् भारः न्यस्तः अस्ति। तथापि अधिकारिषु, समाजसेवकेषु जनतायां च सत्यनिष्ठायाः, सेवाभावस्य, निःस्वार्थतायाः, पारस्परिक-सहयोगस्य च अभावेन कापि योजना सम्यक् प्रकारेण सफलीभूता न भवति। यावत् राजकीयाः अधिकारिणः,

दिनानि एव पूर्वं भारतीय-प्रधानमन्त्रिणः श्रीनेहरूमहोदयस्य विश्वशान्तिस्थापनायै क्रियमाणस्य प्रयत्नस्य प्रशंसां कुर्वता आइन्स्टीनमहोदयेन कथितं यत् वैज्ञानिकानाम् आविष्काराणाम् शान्तिकार्येषु एव प्रयोगः कर्तव्यः न विध्वंसात्मकेषु कार्येषु। यदि सर्वेऽपि वैज्ञानिकाः आइन्स्टीन महोदय इव शान्तिस्थापनपक्षे स्वमतं दद्युः तर्हि वैज्ञानिकैः आविष्कारैः निःसंशयं महान् लाभः भविष्यति।

५९-ग्रामोन्नतिः

अस्माकं देशः ग्रामप्रधानदेशः अस्ति। अस्मिन् देशे नगराणाम् अपेक्षया ग्रामाणां संख्या अधिका वर्तते। देशस्य सर्वाधिका जनता ग्रामेषु एव निवसति। अतः इदं निश्चितं वर्तते यत् यावत् ग्रामाणां समुन्नतिः न भविष्यति तावत् भारतस्य उन्नतिर्न भवितुमर्हति। अतएव ग्रामोन्नतिविषये ध्यानदानस्य सम्प्रति महती आवश्यकता वर्तते।

दुःखस्य अयं विषयः वर्तते यत् अस्माकं ग्रामाणां वर्तमानदशा अतीव शोचनीया वर्तते। एतस्य इदम् एव प्रधानं कारणं वर्तते यत् उन्नतये यानि साधनानि आवश्यकानि भवन्ति तेषां साधनानां ग्रामेषु नितान्तम् अभावः अस्ति। शिक्षायाः कृते समीचीनः प्रबन्धः नास्ति। पुस्तकालयानाम् अभावः अस्ति। व्यायाम-शालायाः तु नाम अपि बहवः जनाः न जानन्ति। स्वच्छतायाः

उपरि ध्यानं नास्ति। औषधालयाः दूरे दूरे सन्ति। गृहशिल्पाना विकासस्य कृते काचन सुविधा नास्ति। मार्गाः त्रुटिताः स्फुटिताः विषमाः सङ्कीर्णाः च वर्तन्ते। नवाविष्कृतानां कृषिसाधनानां सुलभता नास्ति। तथा भूमिविषये सम्पत्तिविषये च महती विषमता वर्तते। इमानि एव कारणानि सन्ति येन ग्रामेषु अशिक्षायाः, कुसंस्काराणां, अस्वास्थ्यस्य, अस्वच्छतायाः, दरिद्रतायाः तथा दुःखस्य च सर्वत साम्राज्यं वर्त्तते।

एतदतिरिक्तं गौवंशस्य ह्रासः, शिक्षितानां श्रमपरिहारिणि उदासीनता, ग्रामीणेषु सहकारितायाः अभावः, परस्परम् ईर्ष्या-द्वेषादीनां बहुलता, भाग्यवादस्य अवलम्बनम्, उत्साहसम्पदः अभावः, सांस्कृतिकचेतनायाः शून्यता, विवाहादिषु संस्कारेषु अनावश्यकः व्ययः, मादकद्रव्याणां सेवनम्, अकर्मण्यता चेति दोषाः अपि ग्रामाणाम् अवनतेः प्रमुखानि कारणानि सन्ति। इमानि च कारणानि न केवलं ग्रामाणामेव प्रत्युत परम्परया सम्पूर्णस्य अपि देशस्य समुन्नतौ महान्ति बाधकानि सन्ति।

अस्यां स्थितौ ग्रामोन्नतिविषये ध्यानदानस्य कियती आवश्यकता वर्तते इति विषये विशेषकथनस्य किमपि प्रयोजनं नास्ति।

यद्यपि ग्रामाणां समुन्नतये वर्तमानप्रशासनं, सर्वोदयसमाजः तथा अन्यानि राजनीतिकदलानि च महान्तं प्रयत्नं कुर्वाणानि दृश्यन्ते। ग्रामपञ्चायतेषु अपि ग्रामसुधारस्य प्रशासनेन महान् कार्यभारः प्रदत्तः अस्ति। तथापि अधिकारिषु, समाजसेवकेषु जनतायां च सत्यनिष्ठायाः, सेवाभावस्य, निःस्वार्थतायाः, पारस्परिक-सहयोगस्य च अभावेन कापि योजना सम्यक् प्रकारेण सफलीभूता न भवति। यावत् राजकीया अधिकारिणः,

BL 17

BHAVAN'S LIBRARY, BOMBAY-7

N B—This book is issued only for one week till (1/

This book should be returned within a fortnight from

the date last marked below

Date	Date	Date
0 [illegible] 1970	R JUN 1972	
1 APR 1970		
28 JUL 1971		
10 6 71		
25 6 71		
12 FEB 1972		
22 JUN 1976		
3 MAR 1980		
15 MAY [illegible]		

BL 13

UNDER RESERVATION

Bharatiya Vidya Bhavan's Sardhagar

Call No Sa 8 Ni/Dwi/45642

Title Bal-Nibandha-mala

Author Wasudeo Dwivedi

This book is issued only for one week till 16/5/69

To be issued after 16-4-1969

Date of Issue	Borrower s No	Date of Issue	Borrower s No
20 MAR 1970	2283	3 MAR 1980	
1 APR 1970	1357		
28 JUL 1971			
10 AUG			

Not to be Issued

BHAVAN'S LIBRARY
Chowpatty Road
BOMBAY 7